भवप्रदं "भक्तिबीजं, 'यमेवैष वृणुते तेन लभ्य' इति श्रुतेः, एतेन परस्परवरणत्वमुक्तं, वरणोक्त्या यथा कन्या स्वाभिलषितमेव स्वपतित्वेन वृणुते वरो वा तादृशीमेव कन्यां स्वस्त्रीत्वेन" तथा द्विधा शृङ्गाररसरूपरमणविहारी व्रजनागरः "स्वदासत्वेनात्मीयत्वेनाङ्गीकारं करोतीत्युच्यते," एतद्भावसमुदायाधिष्ठानं व्रतमध्यस्थासु श्रुतिरूपासु च, तस्य नान्वेषणप्रयासः, विवाहा"नन्तरं नान्यत्र विनियोगस्तस्यास्तथैवैतस्यापीति ज्ञापितं भवति," तथैव तासु भगवति चाभूत्, ज्ञातिगोत्रयोः स्वरूपमस्मिन् विरहाग्निमत्सर्गे साक्षात्प्रभुस्वरूपानुभवादेयभावयुवतिमूललीलामध्यपातित्वमूलसम्बन्धसम्पृक्तम्पुनः साक्षाद्भगवन्मुखारविन्दफलवियोगाग्न्युद्भूतं तदेकानुभवैकपरिनिष्ठं तन्नैसर्गिकधर्मवत्, तत्स्वरूपयोर्निश्चित्यैव परस्परं वरणं, सर्वशुद्धसंस्कारपूर्णप्रमेयबलवतामेवादिमाष्टाक्षरमन्त्रेण वरणं भवति, तत्राष्टाक्षरेषु परामर्शानुमितेरेव प्राधान्यमस्ति, तत्कार्यं 'श्रीकृष्णः शरणं ममे'ति, 'श्रीकृष्णः शरणं मम वदद्भिरेव सततं स्थेय'मित्यादिनापि परामर्शः कर्तव्यः, तद्भावसमुच्चयार्थस्य परामर्शसाहचर्यनियमात्, श्रीत्वेन किं कृष्णत्वेन किं शरणत्वेन किं ममत्वेन किं वदद्भिरित्यनेन किं स्थेयमित्यनेन किमित्यादिरहस्यं मया स्वतन्त्रे हरिणीनां शुद्धज्ञानक्रियाप्राचुर्यप्रस्तावे सर्वोत्तमस्यापि **विवृतौ** प्रपञ्चितमस्ति, परन्तु गोपनार्थानुपूर्व्या, सम्मत्य तु प्रकटतया पुनरुपचर्यते निश्चीयत इत्यर्थः, श्रीसहितं कृष्णपदं तत् सच्चिदानन्दाभिव्यक्तये, सापि सच्चिदानन्दता साक्षान्मूललीलामध्यपातिनी परमसौन्दर्यसाकाराखिलत्रयीधर्मविशिष्टव्यापकधर्मत्वावच्छिन्नत्वेन तन्निखिलसामर्थ्यरूपा, सदंशेन मूलधामनि रसात्मकब्रह्मणि गुल्मलतौषध्यादिपु स्वव्यापकत्वं प्रदर्शयति, चिदंशेन विविधलीलारसभावात्मकस्य रसात्मकब्रह्मणो भगवतो रमणोपयोगिसामग्रीषु सरःसारसहंसमृगीगणादिपु, आनन्दांशेन भगवत्परिकरेपु न्यूनाधिकावयवादिपु, यथा भगवतो बालपौगण्डादिभिरेव याखिलसामग्रीपु न्यूनाधिकप्रतीतिर्भवति तस्यान्तदेवावगन्तव्यं, श्रीपदभावार्थस्त्वयमेव, न त्वक्षरानन्दाभिव्यक्तिस्पष्टका वेदितव्या, यद्वा श्रीसहितं त्रिपदं, तस्य भावार्थोपि त्रयः सत् चित् आनन्द इति, सदित्यनेन सत्तात्वेनोत्तरशृङ्गारस्थायिविप्रयोगात्मत्वाद्रसभूमिका, चिदित्यनेन रसात्मकज्ञानक्रियाविषयग्रहसहितरसभूम्यन्तरे 'कृषिर्विलेखन'इत्यनेन विरहाग्न्यनुभविनां नामप्रमा विलिखिता, मूललीलामध्यपातित्वानुसन्धानेनैव तेषां नामकरणं जातमिति भावः, अस्यां भूमिकायां यादृशीं यादृशीं लीलां स्वयं प्रभुः करोति तथैव तथैव तत्र नामकरणार्थहेतोः प्राकट्यं भवति तद्वदत्रापि तन्मार्गीयत्वेनास्मिन्मार्गे फलमार्गीये तदीयानां नामकरणविधिः, तस्मादादौ नामकरणत्वेष्टाक्षरमन्त्रेण समं ज्ञानक्रियाखिलसमुदायित्वमस्ति तस्यापि स्वरूपं किंलक्षणं ? उत्तरशृङ्गारस्थायिभावरसात्मिका या भूमिका विविधभावकेदारालङ्कृता व्रजवरघोषव्रजजनानां कृषीवलानामुपजीविनी तस्याः कृषिविलेखनायुधो हस्तस्तेनैव ज्ञानक्रियावता तस्य विलेखनमग्निबीजामृतबीजयोः प्ररोहार्थमारोपार्थं च, वस्तुत आदिमे तदानन्दानुभवपर्यवसायिज्ञानक्रियाष्टाक्षरेण वरणसम्बन्धाभिज्ञापकेनोपदिष्टा वेदितव्या, केन हेतुना ? अशनाभावे क्रियाया अप्यभावात्सर्वकरणत्वे निष्फलत्वाप्तेः सन्दर्शनमिति नियमात्, तस्मादष्टाक्षरमन्त्रः श्रीयुक्तक्रियात्मकत्वेन ज्ञानक्रियाखिलदानसामर्थ्यरूपो लीलासम्बन्धी, तस्मादादौ क्रियादानं पश्चाद्भावदानं, साक्षाद्भगवन्मुखारविन्दफलवियोगाग्निप्रकटितमार्गस्थितिरेषास्ति, तस्मादस्मिन्मार्गे तापाग्निज्वालात्मके भगवद्विरहानुभवविज्ञानविषयाभिभूते आगत्य तदीयैरपि विज्ञानविषयोद्धृता क्रियैव सेवासामग्रीषु साधनफलरूपा सुष्ठु कार्या, मानसीसेवापरत्वेन तत्सिद्धौ पुनर्भावदानं भविष्यत्येव, न तत्र विलम्बोस्ति, श्रीसहितकृष्णभावार्थस्येयं भावरूपा पद्धतिर्विज्ञेया, अतोत्र रसात्मकब्रह्मसम्बन्धभावने वरणसम्बन्धो विज्ञेयो भवति, अष्टाक्षरमन्त्रोपदेशप्रस्तावे श्रीसहितं कृष्णपदं, ततो महाभावदानप्रस्तावे केवलकृष्णपदं श्रीरहितमस्ति, कृष्णः फलरूपः साक्षाच्छ्रीमत्स्वामिनीनां भावनाविरहाग्निना नीलशिखिना प्रादुर्भूतस्तासां विरहाग्नियज्ञफलः बाह्याभ्यन्तरयोर्भावावयवनिरवधिसामग्रीभिः प्रसङ्कुलस्तद्दानविषये तदनुभवपर्यवसायित्वेन ज्ञानक्रियाविषयादेः सम्प्रवृत्त्या पूर्वश्रीपदविशिष्टज्ञानक्रियादेरनवसरात् भावात्मकस्यैव स्थितेरुपलब्धेस्तन्महावाक्यार्थपरामर्शे भावदानमेव तदीयेभ्यो भवतीत्यत्रायमेव भावः, कृष्णपदोपादानस्यापि द्विविधत्वं सदात्मकत्वेन सच्चिदानन्दात्मकत्वेन च, अनयोर्द्वयोर्मध्ये यच्चित् तदभावेप्यनुसङ्गतिः किंलक्षणा भवति ? ज्ञानक्रियारहितेत्यर्थः, तस्य ज्ञानक्रियात्मकत्वात्तदभावे तस्याप्यभाव इत्यर्थः, अत एव यावत्पर्यन्तं स्थायिशृङ्गाररसोत्तरानुभवानुगामिनोनुभविनां भावा न भवेयुस्तावत्पर्यन्तं ज्ञानक्रियादेः सेव्यस्वरूपसाधनफलरूपस्य सन्ततिं न परित्यजेत्, तदासौ तु नैसर्ग्यादेव यथा फलागमनसमये पुष्पापचयस्तद्वज्ज्ञानक्रियादेरपि बोद्धव्यः-

---

१ वरणत्वमुक्तमिति टीकापाठः ।

पूर्वं केनापि ज्ञातुमशक्यमित्यर्थः, वरणीयं सुन्दरमिति स्वतो दोषाभाव उक्तः, भजनीयगुणान् वदन् सेवकोद्धारमाह भर्ग इति संसारनिवृत्तिः, भर्जयत्यखिलामविद्यामिति, भर्गश्शब्दः सकारान्तो व्याख्यातः, स्वरूपस्फूर्त्यैव सर्वेषां सर्वाविद्यानाशक इत्यर्थः, स्वरूपमेवाविद्यानाशकं, प्रमेयबलमेतत्, देवत्वेन सर्वज्ञत्वमत एव देवस्य, 'धीमहीति समस्तानां तद्ध्यानं सर्वथा हित'मिति धीमहीति ध्यायेम प्रीतिं वा कुर्म इत्यर्थः, धियो यो नः प्रचोदयादिति धियः बुद्धीः प्रचोदयादिति, तेन सर्वप्रेरकत्वमायाति, प्रकृष्टत्वेन मूलपुरुषोत्तमस्वरूपपर्यन्तं, चोदयादिति प्रेरयति फलसम्बन्धं करोतीत्यर्थः ॥

गायत्री बीजं, वेदो वृक्षः, श्रीभागवतं फलमिति फलसम्बन्धेन श्रीभागवतप्रतिपाद्यं 'वेद्यं वास्तवमत्र वस्त्वि'ति वास्तववस्तुषु 'पिबत भागवतं रसमालयमि'ति रसमालयं, आङ् ईषदर्थे, लयो मोक्षः, यद्रसाग्रे सोपीषदतितुच्छ इत्यर्थः, मोक्षाधिकरसस्तु 'ब्रह्मानन्दात समुद्धृत्य भजनानन्दयोजने' स रसस्तु रससमूहो रास इति 'रासलीलैकतात्पर्य'मित्यर्थः,

---

अतो भावस्य भावाश्रयवत्वात् प्रकृतिः क्रियाया अभाव एव वर्तते यतो भावरूपस्य श्रीकृष्णस्य फलदानान्तरमेव क्रियाया अभावः सूचितः, 'यदा स्याद् व्यसनं कृष्णे कृतार्थः स्यात्तदैव हि' 'तादृशस्यापि सततं गृहस्थानं विबाधकम्' विशेषेण बाधकत्वोक्त्या पूर्वसाधनफलक्रियायास्त्यजनमेव द्योतितं, यत्र क्रियाराहित्यं तत्रैव भावस्य स्वरूपरूपकत्वं भवति, तत्त्वनिर्वचनीयं, न वाग्विषयं, अयमेव कृष्णपदार्थो भावः, अत एव सुबोधिन्यादिषु यत्र श्रीपदपूर्वकं श्रीकृष्णपदमायाति तत्र सच्चिदानन्दरूपत्वेन श्रीमदाचार्याणां विवृतिरस्ति, यत्र केवलं कृष्णपदमायाति तत्र सदानन्दत्वेन निरूपयन्ति, अत एव निवेदनानन्तरं महावाक्यदानानन्तरं परस्परयोर्वरेण्यमिति गायत्र्यन्तर्गततच्छब्दाद् वरणमभवत्, भवति किं? भवत्येव, विवाहानन्तरं भावान्तरभजनं स्वरूपान्तरभजनं वार्तयापि न, मनसापि व्यभिचारिदोषप्रसङ्गात् तत्क्षण एव पातिव्रतधर्ममार्गाद्भ्रश्यते, पत्या त्यागे पुनस्तस्य स्थितिः कुत्रापि नास्ति, वस्तुतो भजनादिकं कृत्वा व्यभिचारिदोषं पुष्णन् प्राप्तफलानिर्वचनीयसर्वोत्कर्षं प्रतिच्योढुं स्वयमेव साधनं कृतवांस्तत्र भगवतः पत्युः किं लगति? न किमपीत्यर्थः, "वरेण्यं सुन्दरमिति स्वतो दोषाभाव उक्तः" परमसौन्दर्यसाकार एव रसात्मकब्रह्मणः साकारत्वमन्याकारान्तरनिरपेक्षत्वात्स्वसौन्दर्यपुरुषार्थरूप उक्तः, अत एव महावाक्यदानानन्तरं कृष्णसदानन्दरूपफलप्राप्त्यनन्तरं पूर्वोक्तप्रकारेण क्रियानिवृत्तौ सत्यां भर्गःशब्दार्थस्य सम्प्रदायप्रवृत्तेर्विनियोगो विभावनीयः, "भजनीयगुणान् वदन् सेवकोद्धारमाह भर्ग इति संसारनिवृत्तिः भर्जयत्यखिलामविद्यामिति भर्गश्शब्दोत्र सकारान्तो व्याख्यात"स्तस्मान्महावाक्यदानानन्तरं कृष्णपदप्राप्तौ तदास्वादजनिरोधेखिलाविद्याया अपचयो भवति प्रकृतित एव, नायासस्तत्र, यतस्त"त्स्वरूपानुभवस्फूर्त्यैव" तदीयानां "सर्वेषां" स्वरूपानुभव एव "सर्वाविद्यानाशक इत्यर्थः," तस्मादस्मिन्पुष्टिभक्तिमार्गे आदौ साक्षाच्छ्रीमद्यशोदोत्सङ्गलालितस्वरूपभावनैव कार्या, तस्याः सर्वाविद्यानाशकत्वात्, अन्यानुसन्धानमात्रविस्मारकत्वात्, उत्तरशृङ्गाररसानुभवविधायकत्वात् स्वरूपमेवाविद्यानाशकं[1], तदितरे निखिलप्रपञ्चमध्यगतसोपाधिकपदार्थे तिरोधायकत्वात् तदेव भजनीयमिति सर्वमनवद्यं, "प्रमेयबलमेतत्", फलरूपत्वेन फलानुभवज्ञानानन्तरूपक्रियाशक्त्यखिलचरित्रमेतत्, "देवत्वेन सर्वज्ञत्वं," "अत एव देवस्य"तदेव "धीमहीति," "समस्तानाम्"तदीयानां तत्फलरसास्वादजनिरोधपरिपूर्णानां, "तद्ध्यानं" बहुभिः प्रकारैः "सर्वथा हितं" फलप्रदञ्चेति "ध्यायेम प्रीतिं वा कुर्म इत्यर्थः" "धियो यो नः प्रचोदयादिति, धियः बुद्धीः," प्रचोदयादिति "अनेन सर्वप्रेरकत्वमायाति," "प्रकृष्टत्वेन मूलपुरुषोत्तमस्वरूपपर्यन्तं" मूलपुरुषोत्तमस्वामिनीनां निगूढभावरूपस्तासां विरहाभियज्ञफलरूपः कृष्णस्तदनुभवपरामर्शविषयपर्यन्तं, "प्रचोदयादिति प्रेरयति फलसम्बन्धं करोति" तत्साक्षात्स्वरूपानुभवादिकं कारयतीत्यर्थः, साक्षाच्छ्रीमत्स्वामिनी राधाशब्दवाच्या महाशक्तिर्भगवत आत्मनोर्धभागोत्तरशृङ्गाररसस्थायिभावोनिशं भृशं सदैव तद्रूपा ॥

"गायत्री बीजं वेदो वृक्षः" वेदरूपेण स्वयं शृङ्गारकल्पवृक्षः "श्रीभागवतं" फलप्रकरणीयं "फलं" "फलसम्बन्धेना"नेकरासादिलीलाविशिष्टत्वेन "श्रीभागवतप्रतिपाद्यं 'वेद्यं वास्तवमत्र वस्त्वि'ति वास्तववस्तुषु 'पिबत भागवतं रसमालय'मिति, 'रसमालयं', आङ् ईषदर्थः, लयो मोक्षः, यद्रसाग्रे मोक्षोपि ईषदतितुच्छ इत्यर्थः, मोक्षाधिकरसस्तु 'ब्रह्मानन्दात्समुद्धृत्य भजनानन्दयोजने" एव, "स रसस्तु रससमूहो रास इति रासलीलैकतात्पर्यमित्यर्थः,

---

१ विनाशकमित्यपरेषां पाठः ।

अत एव रास एव सर्वेन्द्रियास्वाद्यसाक्षात्स्वरूपसम्बन्धः मनोरथान्तरूपः, 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चने'ति श्रुतिप्रतिपाद्यः, 'रसो वै सः रसꣳ ह्येवायं लब्ध्वानन्दीभवती'ति श्रुतेः ॥

ननु प्रचोदयादिति गायत्रीचतुर्थपादस्य संन्यासाश्रमपर्यन्तं प्रेरकत्वमायाति कथं रासलीलैकतात्पर्यमिति चेत्तत्राह, भक्तिमार्गीयसंन्यासस्तु साक्षात्पुष्टिपुष्टिश्रुतिरूपाणां रासमण्डलमण्डनानां, स्वयमेवोक्तं[1] 'सन्त्यज्य सर्वविषयांस्तव पादमूलं प्राप्ता'इत्यादि, चतुर्था[2]ध्याये ताः प्रति च भगवतोक्तं 'एवं मदर्थोज्झितलोकवेदस्वाना'मिति, तस्य स्वात्मत्वेन परमकाष्ठापन्नस्नेहास्पदप्रभोरेव स्फूर्त्येति[3] 'तत्त्वमसी'ति महावाक्यार्थस्य 'तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः। तद्गुणानेव गायन्त्यो नात्मागाराणि सस्मरु'रिति सिद्धिः ॥

"ननु[4] 'तद्योहं सोसौ योसौ सोह'मित्यैतरेयके तैत्तिरीयके चा'हमस्मि ब्रह्माहमस्मी'ति पठ्यते, अत्र मध्यस्थं ब्रह्मपदमुभयत्र सम्बध्यते, तेनावृत्त्या व्यतिहारोतो ब्रह्माभेदः सिद्ध्यति, तथा लीलामध्यपातिभक्तानामपि 'कृष्णोहमहं कृष्ण' इति भावोल्लेखश्च श्रूयते अतस्तदभेदज्ञानं भक्तिफलमिति प्रफुल्लमानं[5] प्रतिवादिनं तत्स्वरूपं बोधयति, रसात्मकत्वाद्भक्तेः संयोगविप्रयोगात्मकत्वाद्वितीयभावोद्रेके यथेतरेश्रुप्रलापादयो व्यभिचारिभावास्तथातिविगाढभावेन तदभेदस्फूर्तिरप्येकः, स न[6] तु सार्वदिकस्तदात्मानं तत्त्वेन विशिंषन्ति तं च स्वात्मत्वेन, सोत्र व्यतिहारपदार्थ इत्यर्थः, अपरं च, उद्देश्यविधेयभावस्फूर्त्या न ह्यद्वैतज्ञानमस्ति किन्तु भावनामात्रं, भक्तानां तु विरहभावे तदात्मक-

---

अत एव रासे" सर्वेन्द्रियास्वाद्यसाक्षात्स्वरूपानुभवफलसम्बन्धः "मनोरथान्तरूपः 'यतो वाचो निवर्तन्ते अप्राप्या मनसा सह' इति श्रुतेः 'आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चने'ति श्रुतिप्रतिपाद्यः, 'रसो वै सः रसꣳ ह्येवयं लब्ध्वानन्दीभवती'ति श्रुते"रिति ॥

"ननु प्रचोदयादिति गायत्रीचतुर्थपादस्य संन्यासाश्रमपर्यन्तं प्रेरकत्वमायाति कथं रासलीलैकतात्पर्यमिति चे"त्तत्राहुः, साक्षाद्भगवन्मुखारविन्दफलवियोगाभि"भक्तिमार्गीयसंन्यासस्तु साक्षात्पुष्टिपुष्टिश्रुतिरूपा"भिः "रासमण्डलमण्डना"भिः "स्वयमेवो"क्तः "सन्त्यज्य सर्वविषयांस्तव पादमूलं प्राप्ता" इत्यादिना, "चतुर्थाध्याये ताः प्रति भगवतोक्तं 'एवं मदर्थोज्झितलोकवेदस्वाना'मिति, तस्य स्वात्मत्वेन परमकाष्ठापन्नस्नेहास्पदप्रभोरेव स्फूर्तेरिति 'तत्त्वमसी'ति महावाक्यार्थस्य 'तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः। तद्गुणानेव गायन्त्यो नात्मागाराणि सस्मरु'रिति सिद्धिः" ॥

"ननु 'तद्योहं सोसौ योसौ सोह'मिति ऐतरेयके तैत्तिरीयके 'चाहमस्मि' 'ब्रह्माहमस्मी'ति पठ्यते, अत्र मध्यस्थं ब्रह्मपदमुभयत्र सम्बध्यते, तेनावृत्त्या व्यतिहारोतो ब्रह्माभेदः सिध्यति, तथा लीलामध्यपातिनां" परमान्तरङ्गभक्तानाम"पि 'कृष्णोहमहं कृष्ण' इति भावोल्लेखः श्रूयते तज्ज्ञानं भक्तिफलमिति पम्फुल्लमानं प्रतिवादिनं तत्स्वरूपं" बोधयन्ति, "रसात्मकत्वाद्भक्तेः संयोगविप्रयोगात्मकत्वा"दुत्तरशृङ्गाररसानुभवज"भावोद्रेके यथेतरेश्रुप्रलापादयो व्यभिचारिभावा'स्तथैवा"तिविगाढभावेन" तदाकारकृतिमान् विरहाग्निसञ्जातवान् "तदभेदस्फूर्तिरप्येकः स न तु सार्वदिकः, तदा स्वात्मानं तत्त्वेन विशिंषन्ति तञ्च स्वात्मत्वेन सोत्र व्यतिहारपदार्थ इत्यर्थः, अपरञ्च उद्देश्यविधेयभाव"स्फूर्ते"र्नहि अद्वैतज्ञानमस्ति किन्तु भावनामात्र"परमान्तरङ्ग"भक्तानान्तु"तदुत्तरशृङ्गाररसानुभवोद्रेकाधिक्ये"तदात्मक-

---

१ ताभिरेव। २ श्रीदशमस्कन्धफलप्रकरणीये। ३ स्फूर्तेरिति टीकाकृतः। ४ नन्वित्यारभ्य **भाव** इत्यन्तं व्याख्यानं ब्रह्मसूत्रसाधनाध्यायतृतीयपादद्वादशाधिकरणस्थ'व्यतिहारो विशिंषन्ति हीतरव'दिति सूत्रव्याख्यानेप्यक्षरश उपलभ्यते। ५ पम्फुल्लमानमिति टीकापाठः। ६ स च नेत्यपि पाठः।

त्वमेवाखण्डं स्फुरति येन लीलाः स्वतः कुर्वन्त्येतद्यथा तथा श्रीमद्भागवतदशमस्कन्धविवृतौ प्रपञ्चितमस्माभिः, एवं सति मुख्यं यदद्वैतज्ञानं तद्भक्तिभावैकदेशव्यभिचारिभावेष्वेकतर इति सर्षपस्वर्णाचलयोरिव ज्ञानभक्त्योस्तारतम्यं कथं वर्णनीयमिति भावः" ॥

भक्तिमार्गीयसंन्यासे चतुर्थपादगायत्र्यर्थस्तु, 'योहं सोसौ योसौ सोह'मिति 'यः' पुरुषोत्तमः 'अहं' भक्तः, फलप्रकरणप्रथमाध्याये 'बाहुप्रसार' इति भिन्नसंयोगोक्तिः, द्वितीयाध्याये 'अन्तर्हिते भगवती'त्यादिना विप्रयोगेऽसावुभयत्रैकात्मको भवतीति द्वितीये 'सोसौ', तृतीयाध्यायेप्येकात्मनोरेव द्विवचनोभयभावात्मकस्फूर्तिः, 'योसौ' उभयभावात्मकः चतुर्थाध्याये 'तासामाविरभूदि'त्यादिनोक्तः 'सोह'मिति 'सः' पुरुषोत्तमः 'अहं' भक्तो भिन्नोस्मि, तत्पञ्चमाध्याये संयोगरसे परमकाष्ठापन्नोनिर्वचनीयरससमूहरासरसाब्धिकल्लोलसर्वेन्द्रियास्वाद्यरसानुभवं करोति, वेदोक्तमहावाक्यात् 'तत्त्वमसि' 'अहमस्मि' 'ब्रह्माहमस्मी'त्यादिविप्रयोगभावात्मकरसानन्दो भवति, संयोगरसे 'कृष्ण[1] तवास्मी'ति,

---

त्वमेवाखण्डं स्फुरति येन लीलाः स्वतः कुर्वन्ति, तद्यथा तथा श्रीभागवतदशमस्कन्धविवृतौ प्रपञ्चितमस्माभिः, एवं सति मुख्यं यदद्वैतज्ञानं तद्भक्तिभावैकदेशव्यभिचारिभावेष्वेकतर इति सर्षपस्वर्णाचलयोरिव ज्ञानभक्त्योस्तारतम्यं कथं वर्णनीयमिति भावः", वस्तुतो द्वैतविशिष्टमेवाद्वैतमन्तरपि बहिरपि, द्विधा शृङ्गाररसाकारादेव, न त्वैक्येपि द्विधात्वं, द्विधात्वेप्येकत्वं, अत एव प्राकट्यदशायामपि गायत्रीरूपेण श्रीमद्वृषभानुजैव विज्ञेया, तत्प्रसवनिगूढभावरूपेण कृष्णशृङ्गारकल्पद्रुमः फलबीजयोरभेददर्शनात् फले बीजं बीजे फलं द्वयोः फलबीजतारतम्येन द्वैतविशिष्टमद्वैतं साक्षाद्वल्लभाग्निप्रकटितभक्तिमार्गे सर्वरसिकजनीनं बीजरूपत्वे फलसङ्घातेनैव सावयवत्वं, अत आन्तरीयफलसञ्ज्ञिकं, बीजस्य सावयवत्वस्य पृथक्त्वनियमात्, फलरूपत्वे बीजसङ्घातेनैव सावयवत्वं, अत एव बहिरनुभवसञ्ज्ञिकं, एवं सति मूललीलायां तद्विधाशृङ्गाररसाकारपरमसौन्दर्यमूलभूतोद्बोधकस्यातिव्याप्त्या गुल्मलतौषध्यादिषु भगवत्परिकरेष्वपि तद् द्वैतविशिष्टमेवाद्वैतमङ्गीकर्तव्यमिति मार्गानुसन्धानपरामर्शस्य शुद्धसंयोगत्वेन फलरूपत्वात्सर्वोत्कर्षत्वं निरूप्यते ॥

"भक्तिमार्गे संन्यासचतुर्थपादगायत्र्यर्थस्तु 'योहं सोसौ योसौ सोह'मिति यः पुरुषोत्तमः अहं भक्तः फलप्रकरणप्रस्तावे प्रथमाध्याये 'बाहुप्रसार'इति भिन्न''संयोगरसानुभवोक्तिः, "द्वितीयाध्याये 'अन्तर्हिते भगवती'त्यादिना विप्रयोगरसानुभवेसौ उभयत्र एकात्मको भवतीति द्वितीये सोसौ, तृतीयाध्यायेप्येकात्मनोरेव द्विवचनोभयभावात्मकस्फूर्तिः योसौ उभयभावात्मकः, चतुर्थाध्याये 'तासामाविरभूत्' इत्यादिनोक्तः सोहमिति सः पुरुषोत्तमः अहं भक्तः भिन्नोस्मि, तत्पञ्चमाध्याये" संयोगानुभवरसे "परमकाष्ठापन्नानिर्वचनीयरससमूहरासाब्धिकल्लोलसर्वेन्द्रियास्वाद्यरसानुभवं करोति," अपि च "वेदोक्तमहावाक्यात् 'तत्त्वमसीति' 'अहं ब्रह्मास्मि' 'ब्रह्माहमस्मि' इत्यादिविप्रयोगाद्व्यात्मकरसानन्दो भवति संयोगरसानुभवे 'कृष्ण तवास्मि' इति", श्रीमत्स्वामिनीं प्रति स्वयं गायत्रीरूपत्वं निश्चित्यानन्तरं वदति तस्य त्वमसि गायत्रीरूपश्रीस्वामिनीनां स्वरूपलीलाद्यनुभवपदार्थानां मूलनिदानरूपाणां भावनाग्निभावस्य त्वमसि, तस्मात् श्रीमत्स्वामिनीनां भावनाग्निभाववशान्नीलज्वालात्मिका त्वमसि, तेन श्रीमत्स्वामिनीनां भावनाग्निभावेन परमसौन्दर्यसाकाराखिलावयवधारिणा नीलज्वालाशिखिना त्वमसि, इदं महावाक्यं रसात्मश्रुतिहृद्गतं सर्वाज्ञातलीलं, तत्प्राकट्यं प्रति कारणताकाशवाणीवत् तत्परामर्शानुमितेरेव न तु स्वाच्छन्द्येन रसात्मकश्रुतेरपि तदपि तदधिकाराभावात् तन्महावाक्यार्थो बद्ध एवाभवदृषीणां मतभेदैर्नैयायिकादिभिश्च, परन्तु महावेदोपादानात् 'कृष्ण तवास्मी'ति महावाक्यभावार्थानुरोधान्महावाक्ये स एव 'तत्त्वमसि'भावार्थ 'कृष्ण तवास्मि' भावार्थयोरैक्यसम्प्रदायानुमित्या यो मयार्थनिष्कर्षः कृतः स एव निवेदितास्माभिः स्मर्तव्यो नान्य इत्यत्र महावाक्यार्थरहस्यं मया भावनामञ्जूषायामुद्घाटितं विज्ञेयं, एवं 'तत्त्वमसि'भावार्थानुषङ्ग आन्तरानुभवान्तरीयपक्षपरत्वेनैव निरूपितः, तद् द्वैतविशिष्टमद्वैतं परमसौन्दर्यसाकाराखिलो यदैव बहिः प्रादुरासीद् विविधबहीरमणविहारे रसोद्रेकसम्पर्कतः संयोगरसानुभवादिकमनुभवितुं तदैव 'कृष्ण तवास्मी'ति महावाक्यप्राकट्यशोभनकालो मया तदीयानां तद्भावाखिलानुभवानुसन्धानसाक्षात्फलसम्बन्धकरणाय प्रदर्शितोस्ति, तदीयैरपि तथैव द्रष्टव्यो वेदितव्यो भावनीयो नित्यसेव्यो भवति वै,

---

१ अत्र कृष्णस्थाने भट्टः कश्चिन्मुधैव भगवन्निति पठति ।

'अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं ममे'ति 'मामेकमेव शरणमात्मानं सर्वदेहिनां। याहि सर्वात्मभावेन यास्यसे ह्यकुतोभय'मित्यादीति दिक्, अत एव श्रुतिः 'आत्मानं द्वेधापातयत पतिश्च पत्नी चाभवता'मिति, व्याससूत्रे 'लोकवत्तु लीलाकैवल्य'मित्यादि ॥

सर्वाज्ञातस्वरूपं हि ब्रह्म पूर्वं रिरंसया। ततोखिलजगद्रूपं भूत्वा तत्रातिदुस्तराः ॥ १ ॥
भक्ताः सर्वं परित्यज्य प्रभुप्राप्त्यै यथा रहः। साक्षात्स्वरूपदानेन परा लीलेयमित्यपि ॥ २ ॥
लीलासम्बन्धिनस्तत्र सर्वं भगवदात्मकम्। प्रवर्तकत्वतो वेणुनादो वेदात्मकोत्र हि ॥ ३ ॥

'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चने'ति दिक्

॥ इति श्रीमद्वल्लभाचार्यविरचितं श्रीमद्गायत्रीभाष्यं सम्पूर्णम् ॥

---

"अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं ममे"ति "मामेकमेव शरणमात्मानं सर्वदेहिनां। याहि सर्वात्मभावेन यास्यसि ह्यकुतोभयम्" इत्यादीति दिक्, अत एव श्रुतिः 'आत्मानं द्वेधापातयत पतिश्च पत्नी चाभवता'मिति, व्याससूत्रेपि च 'लोकवल्लीला-कैवल्य'मिति,[1]" "स्वरूपं" हि शुद्धरसात्मकं द्विधा श्रृङ्गाररसात्मकं परमसौन्दर्यसाकारत्वविशिष्टं बहीरमणरिरंसया प्रादुर्भूय लीलाजगद्रूपं भूत्वा तथैव द्वैतविशिष्टमद्वैतं प्रादर्शयत्, भक्तानां तत्रत्यानां सर्वेषु तत्रत्येषु स्वरूपसम्बन्धिषु पदार्थेषु भगवद्रमणानुकूलसामग्रीसम्पन्नेषु तथैव चकार, यतस्तत्रत्यं सर्वं भगवदात्मकमत्र कृष्णस्वरूपमात्रकं विज्ञेयं, एतन्निखिलतत्त्वस्य प्रवृत्तिर्वेणोः सकाशादेव मूलधामनि व्रजवनयोश्च तस्य प्रत्यहं प्रतिक्षणेषु नवनवभाव-वैचित्र्यात् साक्षाद्रसात्मकशुद्धब्रह्मणः श्वासोच्छ्वासमर्दरंहसा प्रियागुणगणार्णवोर्मिभिरञ्चितेन रसात्मकवेदानुवर्त्य-खिलसङ्कल्पात्मकत्वादिति सर्वमनवद्यं, तत्तु तद्वेद्यमित्यर्थः, न तु त्रैगुण्यविषयात्मकानां वेदानां, 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सहे'ति श्रुतेरित्यादिना तेषां तद्वास्तववस्तुनो दुर्घटत्वेनालभ्यत्वमेवास्ति ॥

॥ इति श्रीमदाचार्यचरणकृतगायत्रीविवृत्युपरिस्वतन्त्रलेखस्तदात्मजात्मजानामिति दिक् ॥

प्रार्थये[2] रसिकाः स्वैरं पश्यन्त्विदमहर्निशम्।
एतद्रसानभिज्ञस्तु मा द्राक्षीदपि वैष्णवः ॥

इति निर्देशतोपि गुह्याद्गुह्यतरं श्रीस्वामिन्यन्तर्गतं रहस्यं कुत्रापि न प्रकटनीयं, तद्रसानुभविनस्तु पश्यन्तु, एतदाज्ञोल्लङ्घने द्वयोरेव निष्फलत्वापत्तिः, प्रत्युत वैपरीत्यफलसाधकं भविष्यति, तस्मादत्र सावधानतया स्थेयम् ॥

---

१ " " ईदृशचिह्नान्तरितस्तु व्याख्यानविभागः प्रायशः श्रीमदाचार्यचरणगायत्रीभाष्यस्थ एव इति विदाङ्कुर्वन्तु विद्वांसः।
२ इत आरभ्यते पाश्चात्यम्।

## ॥ अथ श्रीमद्विट्ठलेश्वरविरचिता श्रीगायत्रीव्याख्या ॥

श्रीकृष्णः स्वात्मनः सर्वमुत्पाद्य विविधं जगत् । तदासक्तांशबोधाय शब्दब्रह्माभवत्स्वयम् ॥१॥
तत्र सर्गादिभिः क्रीडन्नित्यानन्दरसात्मकः । निजभावप्रकाशाय गायत्रीरूप उद्बभौ ॥ २ ॥
सा षड्गुणयुतं सर्ववेदबीजं गुणातिगम् । सर्वावताररूपं हि सर्वतत्त्वोपबृंहितम् ॥ ३ ॥
शृङ्गारैश्वर्यसंयुक्तं पुरुषद्वयपूरणम् । भक्त्या सर्वेन्द्रियाह्लादि चतुर्विंशाक्षरं ततः ॥ ४ ॥
मार्गत्रयप्रकटनं भावत्रयविवर्धनम् । सच्चिदानन्दपूर्णं च त्रिपदेति प्रकीर्त्यते ॥ ५ ॥
छन्दो मन्त्रस्य गायत्री प्रेमोल्लासादहर्निशम् । गायन्तं त्रायते भावमाच्छादयति चैव हि ॥६॥
विश्वामित्रो जगन्मित्रमृषिरत्र हरिः स्वयम् । 'मित्रे चर्षा'विति प्रोक्तेः पूर्वाचापि प्रतीयते ॥७॥

---

### ॥ अथ श्रीमत्पुरुषोत्तममहाराजविरचितं विवरणम् ॥

अथ श्रीमत्प्रभुचरणाः श्रीमद्भागवतारम्भे गायत्र्या उपनिबद्धत्वात्तस्याः स्वरूपं बोधयितुं तदर्थं व्याकुर्वन्तो यथा पुरुषविधब्राह्मणे क्रीडेच्छया रूपसृष्टौ स्वरूपस्य द्वैधीभावेन पतिपत्नीभावसम्पादनोत्तरं नानारूपसृष्टिस्ततः स्वतिरोभावेन जीवानां मोहसम्पादने संसारासक्तिस्तथात्र तदुत्तरं नामसृष्टिः परन्तु मोहनिवारणाय स्वस्य रसरूपत्वबोधनेनाश्रयदानायेति फलभेदं बोधयितुं एतदेवाभिप्रेत्य नवलक्षणलक्षिताश्रयनिरूपकश्रीभागवतारम्भ उपनिबन्धं च बोधयितुं वेदोत्पत्तिप्रयोजनमादावाहुः **श्रीकृ**ष्ण इत्यादि, अयं प्रकारः, 'स आत्मानं स्वयमकुरुते'त्युक्तायामेव सृष्टौ नेतरत्रेति वेदशब्देभ्यो जगन्निर्माणबोधकश्रुतिस्मृतीनां न विरोध इत्याशयेनाहुः **स्वात्मन** इति, **शब्दब्रह्मे**ति 'स एष जीव' इत्यत्रोक्तनादात्मा निःश्वसितस्यावस्थाविशेषरूपः ॥ १ ॥

ततो गायत्र्युत्पत्तिमाहुः **तत्रे**त्यादि, **तत्रे**ति स्वात्मके स्वकृते प्रपञ्चे ॥ २ ॥

तस्याः प्रणवोत्तरावस्थात्वबोधनायाहुः **से**त्यादि, **सर्ववेदबीज**मोङ्कारः 'स सर्वमत्रोपनिषद्वेदबीज'मिति वाक्यात्, तेन यथा तत्र रूपस्य पतिपत्नीभावस्तथात्र नादस्य क्रमेणोङ्कारगायत्रीभाव इत्यर्थः, एतेन **गा**यत्रीकल्पादिप्रसिद्धं सगुणत्वमत्र न विवक्षितमिति बोधितं, तत्र गमकं वक्तुं तद्ब्राह्मणं व्याकुर्वन्तो मन्त्रस्याक्षरात्मकत्वात् पूर्वं तदक्षरसङ्ख्याप्रयोजनमाहुः **सर्वे**त्यादि, क्षराक्षररूपत्वबोधनार्थेन प्रयोजनद्वयमुक्तम् ॥ ३ ॥

तृतीयमेकेनाहुः **शृङ्गार** इत्यादि, शृङ्गारो द्विधा, ऐश्वर्यमष्टधा, अन्तरिन्द्रियं चतुर्धा, बाह्येन्द्रियाणि दश, एवं चतुर्विंशतिः, पुरुषोत्तमत्वबोधनायेदं, तत्रापि सर्वान्तरत्वबोधनाय **पूरण**पदम् ॥ ४ ॥

प्रचारार्थं पदसङ्ख्यातात्पर्यमाहुः **मार्गे**त्यादि, ज्ञानकर्मभक्तिरूपमार्गत्रयस्य प्रकटनं यस्मादिति व्यधिकरणपदो बहुव्रीहिः, एवमग्रेपि भावत्रयं च विभावानुभावव्यभिचारिभेदेन ज्ञेयं, इदमपरं गमकम् ॥ ५ ॥

एवं गुणातीतपरिचायनाय द्वयमुक्त्वा अतः परं तैत्तिरीयश्रुत्युक्तक्रमेणैव उक्तार्थानां पदार्थानां स्वरूपमाहुः **छन्द** इत्यादि, 'छादनाच्छन्द' इत्युक्तमाकृतेर्वाससी यथा आत्मानं छादितं देवैर्मृत्युभीतैश्च वै पुरा आदित्यैर्वसुभी रुद्रैस्तेन छन्दांसि तानि वै' इति योगियाज्ञवल्क्योक्तं 'सर्वेषां मन्त्रतत्त्वानां छादनाच्छन्द उच्यते' इति वाक्योक्तं च, छन्दस्त्वप्रयोजकं रूपमाहुः **भाव**मित्यादि ॥ ६ ॥

'विश्वस्य जगतो मित्रं विश्वामित्रः प्रजापति'रिति बृहद्याज्ञवल्क्योक्तमृषिस्वरूपमाहुः **विश्वामित्र**

---

१ तदात्मानमित्यत्र 'स आत्मान'मिति पाठः क्लृप्त इति दोषमारोपयन्तः पश्यन्त्विदम् । २ उद्दिष्टमित्यपि पाठः ।

**सविता सर्वबीजानां निजानां देवतास्य हि । आचार्यो भगवानग्निर्मुखमस्य प्रकीर्तितम् ॥ ८ ॥**
**गतिज्ञानार्थधातूक्त्या नलोपाच्च प्रतीयते । लोपस्यादर्शनात्मत्वात्प्राकृतानुकृतिर्मता ॥ ९ ॥**
**'ब्रह्मा शिरो' जगद्बीजं सत्यलोकस्थितेरपि । यज्ञात्मको जगद्व्यापी शृङ्गाररसविग्रहः ॥ १० ॥**
**'विष्णुर्हृदय'मित्युक्तं हृद्यं हृदयं श्रुतौ । तत्तद्धर्मप्रधानत्वात्सर्वं च स्वयमेव हि ॥ ११ ॥**
**'रुद्रः शिखे'ति कथनात्क्लेशात्मा स निरूपितः । अहङ्कारो बन्धरूप इति बद्धा शिखा मता ॥ १२ ॥**
**मुखस्याग्नित्वकथनात्तज्ज्वाला च शिखा मता । लौकिकी दुष्टदाहाय 'घोरा तनु' रिति श्रुतेः ॥ १३ ॥**

---

इत्यादि, लौकिकमृषिं परित्यज्य भगवद्ग्रहणे बीजमाहुः **मित्र** इत्यादि, इदं हि विश्वशब्दस्य दीर्घविधायकं सूत्रं, इतः पूर्वं तु 'विश्वस्य वसुराटो'रिति, तथा च विश्वराजो विचारे निरङ्कुशं विश्वाराट्त्वं यथा 'सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ती'ति श्रुतिपुराणादिभिर्हरावेव सिद्धं एवं 'केचित्स्वदेहान्तर्हृदयावकाशे'त्यादिपुराणै'र्द्वा सुपर्णे'त्यादिश्रुतिभिश्च निरङ्कुशविश्वामित्रत्वमपि, तस्यर्षित्वं च 'यो देवानां प्रथमं पुरस्ताद्विश्वाधिपो रुद्रो महर्षि'रिति मन्त्रे तथा पुराणेषु च सिद्धमतोत्र स एवर्षिरित्यर्थः ॥ ७ ॥

'यस्य यस्य तु मन्त्रस्य उद्दिष्टा देवता तु या । तदाकारा भवेत्तस्य देवत्वं देवतोच्यत' इति याज्ञवल्क्योक्तेर्देवतानिष्कर्षमाहुः **सवितेत्यादि**, जन्माद्यधिकरणे 'सर्वयोनिषु कौन्तेये'ति गीतायां च तथैव सिद्धत्वात्स एव देवतेत्यर्थः, एतत्त्रयज्ञापनं चात्यावश्यकं 'ऋचा अविदितार्थेन छन्दोदैवतब्राह्मणेन मन्त्रेण याजयत्यध्यापयति वा स स्थाणुं वर्च्छेति गर्तं प्रतिपद्यत' इति तदज्ञाननिन्दाश्रुतेरिति, 'अग्निर्मुखमि'ति श्रुतिं विवृण्वन्ति **आचार्य** इत्यादि ॥ ८ ॥

'तदवगतिप्रकारमाहुः **गतीत्यादि**, 'अकि अगि गता'विति गत्यर्थोऽगिधातुः गत्यर्थानां च ज्ञानार्थत्वं प्रसिद्धं, तस्मा'च्चाङ्गेर्नलोपश्चे'ति सूत्रेण नलोपे निप्रत्यये च जातेग्निरिति भवति, तथा चाङ्गतेर्गत्यात्मक ज्ञानाधारो भवतीत्यर्थाद्धातूक्त्या चार्थत्वप्रतीतिरित्यर्थः, नलोपात्तत्प्रतीतिप्रकारमाहुः **लोपस्येत्यादि** ॥ ९ ॥

'ब्रह्मा शिर' इति श्रुतिं विवृण्वन्ति **ब्रह्मेत्यादि** ॥ १० ॥

'विष्णुर्हृदय'मित्येतां विवृण्वन्ति **यज्ञात्मक** इत्यादि, 'यज्ञो वै विष्णु'रिति श्रुते'र्विष्लृ व्याप्ता'विति धात्वर्थात् 'रसो वै स' इति श्रुत्या शृङ्गाररसात्मकत्वात् स तथेत्युक्तमित्यर्थः, हृदये विशेषमाहुः **हृद्यमित्यादि**, छान्दोग्ये दहरविद्यायां 'स वा एष आत्मा हृदि तस्यैतदेव निरुक्तं हृद्ययमिति तस्माद्हृदय'मिति, तथा चात्मत्वबोधनायात्र हृदयपदं न त्ववयवविशेषत्वमात्रबोधनायेत्यर्थः, ननु प्रायपाठेनात्र देवताविशेष एव प्रत्याय्यो न तु पर इत्यत आहुः **तत्तदित्यादि**, तथा च 'तस्मिन् स्वयं वेदमयो विधाता स्वयम्भुवं यं स्म वदन्ति सोभूदि'त्यत्रोक्तो भगवद्रूप एव ब्रह्मापि ज्ञातव्य इत्यर्थः, एवं सर्वत्र बोध्यम् ॥ ११ ॥

'रुद्रः शिखे'ति श्रुतिं द्वाभ्यां व्याकुर्वन्ति **रुद्र** इत्यादि, क्लेशात्मत्वं 'रोदयन्तीति रुद्रा' इति बृहदारण्यके निर्वचनाज्ज्ञेयं, अहङ्कारत्वं च 'वैकारिकस्तैजसश्चे'ति दशमस्कन्धे 'शिवः शक्तियुतः शश्वदि'ति सन्दर्भीयवाक्याज्ज्ञेयम् ॥ १२ ॥

'घोरा तनु'रितीयं श्रुतिस्तैत्तिरीयसंहिताद्वितीयाष्टके 'अग्नये रुद्रवते पुरोडाशमष्टाकपालं निर्वपेत् अभिचरन्नेषा वा अस्य घोरा तनुर्यद् रुद्र' इत्याभिचारिकमिष्टिविशेषं प्रकृत्य पठितास्तीति ततः सर्वस्यैव विवक्षितार्थस्य सिद्धिः ॥ १३ ॥

**पृथिवी भगवत्कीर्तेरुत्पत्तेः कारणं मतम् । भक्तिबोधाय चरणरेणुरूपत्वकीर्तनम् ॥ १४ ॥**
**प्रियत्वाय हरेः सर्वप्राणात्मत्वेन वर्णनम् । शुक्लभास्वररूपं तु श्वेतवर्णेति कीर्तितम् ॥ १५ ॥**
**भगवद्योग्यतासिद्ध्यै श्वेतः सर्वाधिको मतः । साङ्ख्यायनसगोत्रत्वं भगवद्भोगसिद्धये ॥ १६ ॥**
**स हि ब्रह्म परं जीवः सच्चिदानन्दतोभयोः । सगोत्रत्वमतः प्रोक्तं न वैलक्षण्यमण्वपि ॥ १७ ॥**
**भगा देशादयो वापि शक्तयश्चेन्द्रियाणि च । ज्ञानानि खण्डाखण्डानि कुक्षौ सर्वविनिश्चयात् १८॥**
**धामान्यर्था विभावाश्च सर्वोपनिषदः शिरः । समीपनयने विष्णोर्विनियोगः प्रकीर्तितः ॥ १९ ॥**

---

'पृथिवी योनि'रिति व्याकुर्वन्ति **पृथिवी**त्यादि, प्रथ प्रख्याने, प्रथनात्पृथिवी, प्रथनं च 'त्वमेतद्विपुलीकुर्वि'त्यादिवाक्यैः सिद्धं, तथा च सैवात्र विवक्षिता न तु भूतात्मिकेत्यर्थः, श्रवणादीन् प्रति **कीर्तेरे**वोत्पत्तिहेतुत्वेन विवक्षितत्वात् तत्कार्यभूत**भक्तिबोध**नाय **चरणरेणुरूप**पृथिवीत्व**कीर्तन**मित्यर्थः ॥१४॥

'प्राणापानव्यानोदानसमाना सप्राणे'त्येतद्व्याकुर्वन्ति **प्रियत्वाये**त्यादि, प्राणेषु प्रियत्वस्य लोकवेदप्रसिद्धत्वात्तदात्मकत्वे सति स प्राण इन्द्रप्रतर्दनोपाख्याने सिद्धो य आत्मरूपः प्राणस्तत्सहितोतस्तथा वर्णनमित्यर्थः, 'श्वेतवर्णे'ति व्याकुर्वन्ति **शुक्ले**त्यादि, **भास्वर**त्वं प्रकाशकचैतन्यरूपत्वाज्ज्ञेयम् ॥ १५ ॥

'साङ्ख्यायनसगोत्रे'ति व्याकुर्वन्ति **साङ्ख्यायने**ति सार्धेन, **हि** यतो हेतोः, **स** साङ्ख्यायनः साङ्ख्यं पदार्थं सङ्ख्यायुक्तं ब्रह्मवादसिद्धं ज्ञानमयनं ज्ञापकं यस्य तादृशवेदात्मा **ब्रह्म, परं** परन्तु, **जीवः** 'स एष जीव'इति वाक्यात्प्राणधारणप्रयत्नवत्त्वेन जीवः, **उभयो**र्जीवब्रह्मणोः **सच्चिदानन्दता, अतः सगोत्रत्वं प्रोक्तं,** तत्प्रयत्नत्यागे **त्वण्वपि वैलक्षण्यं ना**स्ति, तेन भोगसिद्धिरित्यर्थः ॥ १६ ॥ १७ ॥

'चतुर्विंशत्यक्षरा त्रिपदे'त्यस्य प्रागेव व्याख्यातत्वात् 'षट्कुक्षि'रिति व्याकुर्वन्ति **भगा** इत्यादि, **भगा** ऐश्वर्यादयः, **देशादयो** देशकालद्रव्यकर्तृमन्त्रकर्माणि, **शक्तयः** कर्मेन्द्रियाणां समनसां सामर्थ्यानि, **इन्द्रियाणि** समनांसि ज्ञानेन्द्रियाणि, **ज्ञानानि खण्डाखण्डानि** एकैकदर्शनैकैकाङ्गजन्यानि खण्डानि, तान्येव गुणोपसंहारेणान्धहस्तिन्यायेन विशिष्टनिदिध्यासनरूपाणि सन्त्यखण्डानि कुक्षिरूपाणि भवन्तीत्यतः षट्कुक्षिरित्यर्थः, तत्र हेतुः **कुक्षौ विनिश्चया**दिति, समुद्रवत् कुक्षेः सर्वाधारतया विशेषेण सर्वनिश्चयादित्यर्थः ॥ १८ ॥

'पञ्चशीर्षे'ति व्याकुर्वन्ति **धामानी**त्यादि, श्वेतद्वीपानन्तासनवैकुण्ठध्रुवस्थानगोलोकधामानि, **अर्था**स्तन्मात्राणि धर्मार्थकाममोक्षभक्तयो वा, पञ्चास्यशब्द इव पञ्चशीर्षशब्दो विस्तारवाचीत्यभिप्रेत्य पक्षान्तरमाहुः **विभावे**त्यादि, तेषां तेषां भगवदीयानां रसानामालम्बनोद्दीपन**विभावाः** स्त्र्यादय ऋत्वादयश्च, **सर्वोपनिषद**स्तत्तच्छाखास्थाः, उपनिषदां **शिर**स्त्वं तु 'ऋचां मूर्धानं यजुषामुत्तमाङ्गं साम्नां शिरोथर्वणां मुण्डमुण्ड'मिति कौशीतकीये श्रावितं, अन्येषां तूत्कर्षनियामकत्वाभ्यां ज्ञेयं, अत्र सर्वं **ज्यो**तिश्चरणाधिकरणोक्तरीत्या वाच्यवाचकाभेदविवक्षया चोपपन्नमिति न काचिदनुपपत्तिः, 'उपनयने विनियोग' इति व्याकुर्वन्ति **समीपे**त्यादि, विनियोगलक्षणं तु **यो**गियाज्ञवल्क्येनोक्तं 'पुराकल्पे समुत्पन्ना मन्त्राः कर्मार्थमेव च । अनेनेदं तु कर्तव्यं विनियोगः स उच्यते ॥ दौर्बल्यं याति तन्मन्त्रो विनियोगमजानत' इति, ब्राह्मणलक्षणमपि तत्रैव 'निरुक्तस्य तु मन्त्रस्य समुत्पत्तिः प्रयोजनम् प्रतिष्ठानं स्तुतिश्चैव ब्राह्मणं तदिहोच्यत' इति, तन्त्विह 'आयातु वरदा देवी'त्यारभ्य श्रुतं, तथापि 'गायत्र्या गायत्री छन्द'इत्यादेरर्थज्ञानेन पूर्वोक्तं सर्वमेवैतदनुगुणीभविष्यतीत्येतदारभ्यैव व्याख्यातमिति बोध्यम् ॥ १९ ॥

सप्त व्याहृतयः प्रोक्ता भूरैश्वर्यमुदाहृतम् । सर्वाधारत्वतस्तावच्छक्तित्वान्नास्य बाधनम् ॥ २० ॥
अन्तरिक्षत्वकथनाद्भुवो वीर्यं निरूपितम् । सुवः श्रीः श्रीर्मनुष्यस्य कथनादवसीयते ॥ २१ ॥
महो यशः परं प्रोक्तं सुखं तेजस्ततोत्र हि । जनो वैराग्यमित्युक्तं तापनाशकता यतः ॥ २२ ॥
जनतायां तु तन्मुख्यमतो जन इतीरितम् । यस्य ज्ञानमयं प्रोक्तं तपस्तस्मात्तदेव हि ॥ २३ ॥
सत्यं परमिति प्रोक्तं स्वरूपमिति निश्चितम् । लोकवेदप्रसिद्धार्थकथनाय तदीयताम् ॥ २४ ॥

---

एतदग्रे 'ओम् भू'रित्यादिना प्रणवाभ्यासः सप्त व्याहृतयश्चोक्ताः, तत्र प्रणवो गायत्रीशिरः समाप्तावपि वर्तत इति तं तत्रैव विवरिष्यन्तोत्र व्याहृतीरेवाहुः **सप्ते**त्यादि, **प्रोक्ता** इति विनियोगोक्त्यनन्तरमुक्ताः, एतासां व्याहृतित्वं तेनैव निरुक्तं पूर्वं तासां त्रिचतुष्पञ्चसप्तभेदानुक्त्वा 'भूर्भुवः स्वस्तथा पूर्वं स्वयमेव स्वयम्भुवा । व्याहृता ज्ञानदेहेन तेन व्याहृतयः स्मृता' इति, विवक्षिता भेदास्तत्रैवोक्ता इत्यनपेक्षितत्वादन्य इहोच्यन्ते, तत्राद्यायाः सद्वाचकत्वादैश्वर्यमेव तया मुख्यत्वेन प्रतिपाद्यत इति बोधयन्ति **भूरि**त्यादि, तत्र हेतुः **सर्वाधारत्वत** इति, भगवदैश्वर्यस्य तथात्वादित्यर्थः, ननु मुख्यार्थपरित्यागेन किमित्येवं व्याख्यायत इत्यत आहुः **तावदि**त्यादि, **गीतायां** 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर' इत्यैश्वर्येण सर्वाधारत्वबोधनमतो भगवत**स्तावच्छक्तित्वादस्यै**वंव्याख्यानस्य कुतर्केभ्यो **न बाधनं, व्यास**चरणैरेवोत्तरतन्त्रे तथाङ्गीकारात्, तथा च लौकिकार्थग्रहण एव मुख्यार्थत्यागो वृत्तिसङ्कोचश्च न त्वत्रेत्यर्थः ॥ २० ॥

द्वितीयां विवृण्वन्ति **अन्तरिक्षे**त्यादि, लोकप्रसिद्धविचारे भुवो**न्तरिक्षत्वकथनात्** 'तेन्तरिक्षमजयन्नि'ति श्रुत्या तस्मिन् रुद्राणां प्रभुत्वात् द्वितीयस्कन्धीयतृतीयाध्याये वीर्यकामानां तद्भजनस्योक्तत्वात् तत्प्रभुत्वेन **भुवः** पदाद्**वीर्यं निरूपित**मित्यर्थः, तृतीयामाहुः **सुव**रित्यादि, तैत्तिरीयाणां सप्तमाष्टके द्वात्रिंशद्रात्रप्रसङ्गे श्रावितं '**श्रीर्हि मनुष्यस्य** सुवर्गो लोक' इति, अत एवं **कथनात्** भगवतः श्रीरेव **सुव**रित्यर्थः ॥ २१ ॥

चतुर्थीमाहुः **मह** इत्यादि, तत्र हेतुः **यशः परं प्रोक्त**मिति, लोके शास्त्रे च श्र्यपेक्षया यश एव उत्कृष्टं प्रोक्तं, **ततो** यशस्त्वादे**वात्र** महर्लोके **सुखं** स्वर्गापेक्षयाधिकं तेजोबोधकमहःशब्दवाच्यत्वात् **हि** निश्चयेन **तेज** इत्यर्थः, एतेन सर्वप्रसिद्धार्थग्रहणेपि तत्स्वरूपविचारतस्तेषां भगवद्धर्मांशतैव स्फुटतीति व्याख्यातोर्थः सर्वोप्यविवाद इत्यर्थः, पञ्चमीमाहुः **जन** इत्यादि, वैराग्यत्वे हेतुः **तापे**त्यादि, 'जनं प्रयान्ति तापार्ता महर्लोकनिवासिन' इति वाक्यात्स लोकस्तापनाशकता च वैराग्य एव स्फुटेति **जनो वैराग्यमित्युक्त**मित्यर्थः ॥ २२ ॥

ननु तत्राग्नेय एव तापो नाश्यते न तु सांसारिक इति कथं वैराग्यतेत्यत आहुः **जनताया**मित्यादि, 'स्वायम्भुव ब्रह्मसत्रं जनलोकेभवत्पुरा । तत्रत्यानां मानसानां मुनीनामूर्द्ध्वरेतसा'मित्यादिवाक्यात् तत्रत्यजनसमूहे मुख्यं वैराग्यमतो न संशयस्तथात्व इत्यर्थः, षष्ठीमाहु**र्यस्ये**त्यादि, **तदे**वेति ज्ञानमेवेत्यर्थः, **हि**र्हेतौ, श्रुतिस्तु श्वेताश्वतरस्था ॥ २३ ॥

सप्तमीमाहुः **सत्य**मित्यादि '**सत्यं परं** परं सत्य'मिति श्रुति**स्तै**त्तिरीयोपनिषदि, अत्र सत्यस्य परत्वेन विधानात् निरङ्कुशस्य परत्वस्य च स्वरूप एव सत्त्वादत्र तदेव **निश्चितं** अर्थत्वेन निर्णीतमित्यर्थः, एवं सार्धचतुर्भिर्व्याहृतयो व्याख्याताः, अत परं गायत्र्याः पदानि सार्द्धसप्तभिर्विवृण्वन्ति **लोके**त्यादि, 'अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तम' इत्यस्यार्थस्य **कथनाय** गायत्रीस्थस्**तत्**च्छब्दः, **ईयतां** ज्ञायतामित्यर्थः ॥ २४ ॥

**द्वादशात्मत्वकथनात्सविता पुरुषोत्तमः । रूपमासक्तिजनकं वरणीयमितीरितम् ॥ २५ ॥**
**वरणे स्वार्थपरता निवृत्त्यै वृणुते यतः । अन्योन्यरसबोधाय तथा वा समुदीरितम् ॥ २६ ॥**

**द्वादशात्मे**त्यादि, 'द्वादशो हि पुरुष'इति श्रुत्या पुरुषस्य **द्वादशात्मत्वकथनात्** निरङ्कुशस्य जगज्जनकत्वस्य तस्मिन्नेव पुरुषे सत्त्वात्सवितृपदेनात्र **पुरुषोत्तम** एवोच्यत इत्यर्थः, एतेन 'विश्वामित्र ऋषिश्छन्दो गायत्र्या देवता रवि'रिति भारद्वाजोक्तं प्रतीकविषयत्वादनादरणीयमिति बोधितं, स्मृत्यन्तरे तु 'आदित्यमण्डलासीनं रुक्माभं पुरुषं परम् ध्यायन् जपेत्तदित्येतन्निष्कामो मुच्यते द्विज' इति तथा 'आदित्यमण्डलान्तःस्थं परं ब्रह्माधिदैवतम् । छन्दोनिवृत्त्या गायत्री मया दृष्टा सनातनी'त्युक्तं, शैवास्तु **भर्गः**शब्दं प्रथमान्त'मकर्तरि च कारके सञ्ज्ञाया'मिति सूत्रेण घञन्तं चाङ्गीकृत्य यो भर्गो नो धियः प्रचोदयात् तत्पदं च लुप्तषष्ठीकमङ्गीकृत्य तस्य सवितुर्देवस्य वरेण्यं धीमहीत्यन्वयं वदन्तः शिवपरत्वं शिवस्य परमपुरुषत्वमन्यथा सवितृपदस्य ब्रह्मवाचकत्वे **'य'** इति पुल्लिङ्गपदेन निर्दिष्टस्य कर्तुरनन्वयापत्तेरित्याहुः तदसङ्गतं, भर्गःशब्दस्य शिवासाधारणत्वाभावात्, 'विष्णुसञ्ज्ञ'मिति श्रुतेः, 'काचिद्वरेण्यं सवितुर्भर्गं विष्ण्वभिधं जगावि'ति तैरेवोक्तत्वात्, बृहद्योगियाज्ञवल्क्येपि 'हिरण्यगर्भं पुरुषं व्योम्नि तद्विष्णुसञ्ज्ञितं' **'भ** इति भासते लोकान् **र** इति रञ्जयते प्रजाः । **ग** इत्यागच्छतेजस्रं भरगाद्भर्ग उच्यते' इति कथनात्, किं चापाततः शिवप्रतीतावपि 'रविमध्ये स्थितः सोमः सोममध्ये हुताशनः । अग्निमध्ये स्थितं सत्त्वं सत्त्वमध्ये स्थितोच्युत' इति मैत्रायणीयोपनिषदि 'रविमध्ये स्थितः सोमः सोममध्ये हुताशनः अग्निमध्ये स्थितं सत्यं सत्यस्यान्तः स्थितोच्युत' इति बृहद्योगियाज्ञवल्क्ये च सूर्यान्तः सोममुमासहितं शिवमुक्त्वा ततः सर्वान्तरच्युतो भगवानेव प्रतिपादित इति सूक्ष्मेक्षिकया विचारकाणां पुरुषोत्तमस्यैव स्फुरणं, न च मैत्रायणीय एव 'अथ भर्गो देवस्य धीमहीति सविता वै देवस्ततो योस्य भर्गाख्यस्तं चिन्तयामीत्याहुर्ब्रह्मवादिन' इत्यत्र भर्ग इति सन्धिदर्शनेन तस्यादन्तत्वं शङ्क्यं, शकन्ध्वादित्वाट्टेः पररूपेप्येवंप्रयोगसिद्धेरप्रत्यूहत्वात्, एतेनैव 'तद्भर्गाख्यं किमपि हि पर'मिति साम्बस्तुतिरपि व्याख्याता ज्ञेया, नापि 'कः सविता का सावित्री'त्युपक्रम्य 'द्वितीयपादो भर्गमय' इति तलवकारब्राह्मणे प्रयोगाददन्तत्वसिद्धिः, पृषोदरादित्वेन सलोपेप्येवं प्रयोगसम्भवात्, अस्तु वादन्तत्वं, तथापि पूर्वोक्तमैत्रायणीयवाक्ये भर्गःपदस्य द्वितीयपाद एवान्वयस्य श्रावणात्तस्य चादन्तत्वपक्षेपि द्वितीयायाश्छान्दसत्वेन स्वादेशसिद्धेस्तदनादृत्य तस्य तृतीयपादेनान्वयोररीकरणं मुधैवेति दिक्, इदं सर्वं शैवानां मतं शाक्तानां च मतं मया प्रहस्ताख्ये वादे प्रपञ्च्य दूषितमतो नेह प्रपञ्च्यते, अत 'एक एव नारायण आसीन्न ब्रह्मा न ईशानः' 'पुरुषो ह वै नारायणोकामयते'त्यादिषु परब्रह्मणि पुल्लिङ्गप्रयोगस्य सवितृत्वोपाधावपि दर्शनात्पुरुषपदप्रयोगस्यापि तत्प्रकरणे सत्त्वादत्र सवितृपदेन पुरुषोत्तम उच्यत इत्येव युक्तं, **वरेण्य**पदं विवृण्वन्ति **रूप**मित्यादि, 'तत्सवितुर्वरेण्यमित्यसौ वा आदित्यः सविता स वा एवं प्रवरणीय आत्मकामेनेत्याहुर्ब्रह्मवादिन' इति मैत्रश्रुतौ प्रकारवाचिना **एवं**पदेन कामयितव्यात्मधर्मस्यात्मत्वस्य प्रकारत्वेन परामर्शान्निरुपधिप्रियत्वस्य च वाक्यान्वयाधिकरणे परस्मिन्नेव ब्रह्मणि विचारितत्वात्तथेत्यर्थः ॥ २५ ॥

एवं कथनप्रयोजनमाहुः **वरण** इत्यादि, **यतो** जीवो यद्भगवन्तं वृणुते तत् प्राकृतत्वात्मकस्य स्वान्यथारूपस्य **निवृत्त्यै वृणुते**तो **वरणे स्वार्थपरता** जीवपुरुषार्थसाधकत्वं, तथा च जीवपुरुषार्थसिद्ध्यर्थं वरणीयत्वकथनमित्यर्थः तदुक्तं **योगिना** 'वरेण्यं वरणीयं तु जन्मसंसारभीरुभि'रिति पूर्वोक्तश्रुतित

१ 'तेजोमय' इत्यपि पाठः ।

**भयकामाद्यभावाय भोग्यत्वाय च भर्जनम् । दशलीलावबोधाय देवत्वं दुर्लभत्वतः ॥२७॥**
**दशावस्थावबोधाय प्रीतिर्ध्यानं च कीर्तितम् । स्वस्यायोग्यत्वतो बुद्धिप्रेरणं ध्रुववन्मतम् ॥२८॥**
**निरोधसिद्धये धीषु बहुत्वं परिकीर्तितम् । जीवे बहुत्वकथनं तत्सम्बन्धिषु सिद्धये ॥ २९ ॥**
**नित्यसम्बन्धसिद्ध्यर्थं षष्ठी जीवेशयोर्मता । उत्सिक्तभावबोधाय स्वभावत्याजनाय च ॥ ३० ॥**
**वाञ्छाधिक्यज्ञापनाय प्रकर्षः परिकीर्तितः । आशीरन्ते पूर्णतायै प्रेरणं सर्वतोधिकम् ॥ ३१ ॥**

एव सिद्धं, मुख्याधिकारसम्पादकतया मुख्यं योजनमाहुः **अन्योन्येत्यादि**, यथा मुख्यमहिषीस्थलेन्योन्यचित्तव्यतिषङ्गेन परस्परं वरणं तथा **रसबोधाय वा** वरणीयत्वं सम्य**गुदीरित**मित्यर्थः, **वा**शब्द एवं भावस्य दुर्लभत्वबोधनाय ॥ २६ ॥

**भर्गः**पदं विवृण्वन्ति **भये**त्यादि, पूर्वोक्त**मैत्र**श्रुतौ एव भर्गःशब्दस्य द्वितीयपादेन्वयं बोधयित्वा 'अथ भर्ग इति यो ह वा अमुष्मिन्नादित्ये निहितस्तारकोऽक्षिणीवैष भर्गाख्यो भाभिर्गतिरस्य हीति भर्गो भर्जयतीति वैष भर्ग इति रुद्रो ब्रह्मवादिनोथ भ इति भासयतीमान् लोकान् र इति रञ्जयतीमानि भूतानि ग इति गच्छन्त्यस्मिन्नागच्छन्त्यस्मादिमाः प्रजास्तस्माद्भरगत्वाद्भर्गः' इत्युक्तत्वात् **योगि**नापि 'भ्रस्ज पाके भवेद्धातुर्यस्मात्पाचयते ह्यसौ भ्राजते दीप्यते यस्माज्जगच्चान्ते दहत्यपि ॥ कालाग्निरूपमास्थाय सप्तार्चिः सह रश्मिभिः । भ्राजते स्वेन रूपेण तस्माद्भर्ग इति स्मृत' इत्युक्तत्वात् श्रुतिस्मृतिव्याख्यातं यद्भर्जनं तद् **भयकामादयो** ये सर्वात्मभावविरोधिनो दोषास्त**दभावाय,** किञ्चात्र श्रुत्यादिषु नानानिरुक्तिबोधनेन गुणोपसंहारो बोधितः, तथा सति 'सोऽश्नुते सर्वान् कामान् ब्रह्मणा सहे'तिश्रुत्युक्तभोक्तृत्वार्थं जीवस्य **भोग्यत्वाय** च तत्, अत एव स्मृत्यन्तरे 'भर्जयत्यखिलाविद्या'मित्युक्तं, इदं चात्र सङ्कर्षणस्य कार्यं, वरणीयत्वं वासुदेवस्य सवितृत्वं प्रद्युम्नस्य लोकवेदप्रसिद्धत्वमनिरुद्धस्येति बोधितं, तेन ब्रह्मविष्णुहरात्मकत्वमप्युक्तप्रायमतो न **मैत्र**श्रुतेरपि विरोधः, **दे**वपदं विवृण्वन्ति **दशे**त्यादि, 'दिवु क्रीडाया'मिति दशविधक्रीडाबोधनाय देवत्वमुक्तं, तेन लोकवेदातीतरूपता बोधिता, किञ्च 'द्युस्थानो भवती'त्यपि **निरुक्ते**र्व्यापिवैकुण्ठस्थायित्वेन **दुर्लभत्व**मतो **दे**वत्वमित्यर्थः, एतदेव **योगि**नापि निरुक्तं 'दीप्यते क्रीडते यस्मादुद्यते द्योतते दिवि । तस्माद्देव इति प्रोक्तः स्तूयते सर्वदैवतै'रिति, तेन लोकवेदप्रसिद्धस्तदतीतश्च पुरुषोत्तम एवात्र प्रतिपाद्य इति निर्णयादस्या मुख्यविद्यात्वं न तु प्रतीकविद्यात्वमिति बोधितम् ॥ २७ ॥

**धीमही**ति पदं व्याकुर्वन्ति **दशावस्थे**त्यादि, वरेण्यपदेन पूर्वं **प्रीतिः** धीमहीत्यनेन **ध्यानं** च यत्कीर्तितं तच्चक्षूरागादिरूपा या रसस्य दशावस्थास्तदवबोधाय, तथा चैवं मन्त्रार्थमगवत्य ध्याने दशाप्यवस्थाः सम्पाद्य प्राकृतं रूपं नाशयित्वा तस्य स्वाश्रयप्रत्यापत्तिर्भगवता देयेति ज्ञापितं, तृतीयपादं विवृण्वन्ति **स्वस्ये**त्यादिभिः सार्धैस्त्रिभिः, **ध्रुवव**दिति, तदुक्तं 'योन्तः प्रविश्य मम वाचमिमां प्रसुप्तामि'ति ध्रुवेणैव ॥ २८ ॥

**निरोधसिद्धय** इति प्रपञ्चविस्मरणपूर्वकस्वासक्तिसिद्धये, धीबहुत्वं सर्वेन्द्रियोपलक्षकं, तेन तथेत्यर्थः, **तत्सम्बन्धिषु सिद्धय** इति वृतजीवपरिकरभूतेष्वपि निरोधसिद्धये ॥ २९ ॥

**स्वभावत्याजना**येति पूर्वस्वभावस्य निःशेषनिवर्तनाय ॥ ३० ॥

नन्वाशिषा कथं **पूर्णते**त्यत आहुः **प्रेरणं सर्वतोधिक**मिति, एवम्प्रकारकभक्तियोगस्य सर्वेभ्योऽदेयत्वेनैवम्प्रेरणाभावादतिकृपयैव प्रेरणं, एवं विलक्षणवरणकार्यत्वादाशास्यमतस्तस्यैव सर्वाधिकत्वात्तेनैव पूर्णतेत्यर्थः, एवं त्रिपदा गायत्री व्याख्याता, यद्यप्यस्याश्चतुर्थः पादः **काण्वादिनां बृहदारण्य**के श्राव्यते तथाप्यप्राकरणिकत्वात्स प्रकृतोपयोगी न भवतीत्यतो न व्याख्यातः ॥ ३१ ॥

१ इदमधिकं क्वचन ।

**आपः श्रद्धा धर्ममूलं ज्योतिरप्यस्फुटौ परौ । भावास्त्रयो मन्त्रपूतौ प्रोक्ता व्याहृतिभिः स्फुटाः ॥**
**दोषाभावाय सर्वस्य ब्रह्मात्मत्वेन कीर्तनम् । नवीनभावजनक उभयो रतिवर्धनः ॥ ३३ ॥**
**तस्मात्प्रणव इत्युक्तस्तस्याप्यर्थोऽयमेव हि ॥ ३४ ॥**

---

अतः परं शिरो व्याकुर्वन्ति **आप**इत्यादिसार्धेन, तच्च षोडशाक्षरं 'षोडशाक्षरकं चैव गायत्र्याश्च शिरः स्मृतम्' 'ओमापोज्योतिरित्येष मन्त्रो यस्तु प्रकीर्तित' इति योगि**याज्ञ**वल्क्यवाक्यात्, तत्र प्रणवस्याग्रे विवरणीयत्वात्तं विहायान्येषामर्थं स्वरूपं चाहुः **आप** इत्यादि, तत्रापां श्रद्धात्वं छान्दोग्यबृहदारण्यकयोः पञ्चाग्निविद्यायां सिद्धमत **आपः श्रद्धा**, सा च धर्ममूलं, अश्रद्धया कृतस्यासत्त्वात्, 'अश्रद्धया हुतं दत्त'मिति गीतावाक्यात्, **ज्योतिरपि** धर्ममूलं, सूर्याग्निभ्यामन्यैश्च ज्योतिर्भिरेव धर्मप्रवृत्तेः **परौ** 'रसोमृत'मिति पदाभ्यामुक्तौ रसामृतपदार्थौ, **अस्फुटौ** गूढार्थौ, तथा च येषां यथा विवक्षितौ तथा तैर्ग्राह्याविति प्रकृते मुख्याधिकारिणां विवक्षितौ 'रसो वै स' इति 'अमृतं चैव मृत्युश्च सदसच्चाहमर्जुने'ति श्रुतिस्मृत्युक्तौ, तत्र धर्मपुरस्कारेण मूलरूपात्मकावेव ग्राह्यौ, **मन्त्रपूतौ** शिरोमन्त्रसमाप्तौ, **व्याहृतिभि**'र्भूर्भुवः सुव'रिति तिसृभिः, **त्रयो भावा** राजसतामससात्त्विकैश्वर्यवीर्यश्रीकृताः, **स्फुटाः** व्याहृतिवाच्यस्वरूपविचारे प्रकटा एव **प्रोक्ताः** ॥ ३२ ॥

तेषु अबादिषु च प्राकृतत्वेन दोषवत्त्वं शंक्येतेति लिङ्गभूयस्त्वाधिकरणविषयवाक्यसिद्धन्यायेन **दोषाभावाय** मध्ये ब्रह्मपदेन **सर्वस्य** ब्रह्मत्वेन **कीर्तनं**, तथा च शिरोमन्त्रेऽपि प्रकारविशेषेण ब्रह्मैवोच्यत इत्यर्थः, अतःपरं प्रणवं विवृण्वन्ति **नवीने**त्यादि, तत्रोङ्कारस्त्रिवृत् परमात्मवाचकः, 'ततोभूत्त्रिवृदोङ्कारो योऽव्यक्तप्रभवः स्वराट् । स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मन' इति द्वादशस्कन्धवाक्यात्, ईश्वरं प्रकृत्य 'तस्य वाचकः प्रणव' इति **पतञ्जलि**नाप्युक्तत्वाच्च, **यो**गिना तु द्वितीयाध्याये तेषां तेषामृषीणां मतान्युपन्यस्य चतुःषष्टिभेदा उक्ताः, श्रुतिषु च कचिदेकमात्रो द्विमात्र इत्येवं षण्मात्रापर्यन्तमुक्तः, तत्र तत्रार्थभेदश्च तस्योक्तः, तत्सर्वमनुपयुक्तत्वादत्र नोच्यते, किन्तु 'ओङ्कारः प्रणवे योज्यः प्रणवं ब्रह्मणि न्यसेत् । आनन्दं परमं ब्रह्म तत्प्रविश्यामृतो भवे'दिति **यो**गिवाक्यात् 'ओङ्कारं सर्वेश्वरं द्वादशान्त आनन्दामृतरूपं प्रणवं षोडशान्त'इति **ता**पनीयश्रुतेश्चोङ्कारप्रणवौ तुल्योच्चारत्वेपि स्वरूपतोर्थतश्च भिन्नौ, तत्र समात्र ओङ्कारः अमात्रः प्रणव इति भेदः, **आथर्वणानां गो**पथब्राह्मणे तथा व्युत्पादनात ततश्चाप्तेरवतेर्वा निष्पन्नः समात्रः, अव्युत्पन्नस्त्वमात्र इति फलति, **गी**तायां **तै**त्तिरीये च 'ओमित्येकाक्षरं ब्रह्मे'ति कथनादमात्रः प्रणव एव प्रकृते विवक्षित इति तस्यार्थ आनन्दामृतरूप एवेति तत्र प्रकटनीयो यः **सर्वा**त्मभावः सोन्यत्राप्रसिद्धत्वा**न्नवीनः**, अयं च मन्त्र**स्तज्जनकः** प्रकर्षेण नवः यस्मादिति, **यो**गिना तु 'प्राणनात्प्रणवः स्मृत' इति निरुक्तं, तदेतद्धृदि कृत्वाहुः **'उभयो रतिवर्धन'** इति, 'को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्या'दिति तैत्तिरीये ब्रह्मणः प्राणितृत्वं श्रावितं तदत्रोभयरतिवर्धनत्वेनैवाभिप्रेतं, अन्यथैतद्भावानुदये एकत्रैवोदये वा प्राणनमेव न स्यादिति द्वारत्वादस्य मन्त्रस्य तथात्वं, अत एव प्रतिव्याहृति प्रतिमन्त्रं चास्याभ्यासः सम्पुटीकरणं चानेनेति, एवं च यथा **सामराज**मन्त्रव्याख्याने 'एष एवोग्र एष ह्येव व्याप्ततम' इत्यादीनां मन्त्रपदोक्तानामर्थानां नृकेसरित्वेन विधानत्तमुरतापनीये श्राव्यते तथात्र सर्वमन्त्रार्थानां प्रणवत्वेन विधानमित्यभ्यासबीजकथनेन बोधितम् ॥ ३३ ॥ ३४ ॥

**यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥३५॥**

## ॥ इति श्रीमद्विट्ठलेश्वरचरणकृताः श्रीगायत्र्याद्यर्थ-प्रकाशकारिकाः समाप्ताः[1] ॥

---

नन्वयमर्थः सर्वत्र कुतो न प्रसिद्ध इत्याकाङ्क्षायां श्वेताश्वतरश्रुतिमेव समाप्तौ पठन्ति **यस्येत्यादि**, तथा च स्वरूपज्ञानपूर्वकं देवगुरुभजनेनान्तःकरणस्य वैशद्यरूपे महत्त्वे सत्येवास्यार्थस्य प्रकाशो नेतरथा, ज्ञानं च 'यमेवैष'इति श्रुतेर्वरणाधीनं, अतस्तदभावान्न सर्वत्र प्रसिद्ध इत्यर्थः ॥ ३५ ॥

इति श्रीवल्लभाचार्यचरणाब्जप्रसादतः । यदस्फुरत्तदलिखत्तद्दासः पुरुषोत्तमः ॥ १ ॥
एतेन श्रीविठ्ठलेशप्रभवो दीनवत्सलाः । प्रसीदन्तु सदा दासबाहिर्मुख्यनिवर्तकाः ॥ २ ॥
एष पुष्पाञ्जलिः श्रीमद्बालकृष्णपदाम्बुजे । समर्पितस्तद्वचनवनराजिसमुद्भवः ॥ ३ ॥
तेन प्रसीदतान्नाथो मादृक्कृपणवत्सलः ॥ ४ ॥

**॥ इति श्रीमद्वल्लभनन्दनचरणैकतानश्रीपीताम्बरतनुजश्रीपुरुषोत्तमविरचितं श्रीमत्प्रभुचरणकृतगायत्र्याद्यर्थप्रकाशकारिकाविवरणं समाप्तम् ॥**

---

१ आदर्शग्रन्थेषु—'इति श्रीमद्विठ्ठलेश्वरदीक्षितानां हस्ताक्षरेषु लिखितान्येतानि पद्यानि गायत्र्यर्थोपनिबन्धनानि पूर्णानी'त्युपलभ्यते ।

## ॥ गायत्र्यर्थः ॥

अथ श्रीगायत्र्यर्थो विचार्यते,

तत्र,

यदुक्तमिति गायत्र्या देवता श्रीसदाशिवः । असाधारणतत्रत्यभर्गशब्देन निश्चितः ॥ १ ॥
तत्तुच्छमेव लिङ्गस्य विष्णुसाधारणत्वतः । तद्बोधकश्रुतेरग्रे स्वयमेव निरूपणात् ॥ २ ॥
यदुक्तमेव भर्गाख्यो रुद्रो हि ब्रह्मवादिनः । इति मैत्रायणीयानां वाक्यमर्थनिरूपणे ॥ ३ ॥
तदन्यार्थं यतस्तस्मिन्नयमर्थो न लभ्यते । अत्र योन्तरादित्ये स भर्गाख्यस्त्रिधास्य तु ॥ ४ ॥
योगो यथान्यकार्याभ्यां तथा संहरणादपि । बोधितस्तेन रुद्रत्वं तस्यैवात्र निगद्यते ॥ ५ ॥
तथा च द्वित्वलिङ्गेन हरिरेवेति निश्चयः । श्रुत्यन्तरे गुणातीतः सर्वैः शब्दैः स उच्यते ॥ ६ ॥
यतः प्रवृत्तिः शब्दानां मुख्या तत्रैव सम्मता । श्रुतेर्यद्वात्र रुद्रत्वं प्राणत्वायोपवर्णितम् ॥ ७ ॥
अतो मर्त्यशरीरान्ते प्रयान्तो रोदयन्ति हि । इत्येतद्वाजिशाखोक्तरूपा अप्येष एव हि ॥ ८ ॥
इति ज्ञापयितुं धातुर्णिजन्तोत्र निरूप्यते । (किञ्च,) भ्रस्जपाके भवेद्धातुर्यस्मात्पाचयतेप्यसौ ॥ ९ ॥
भ्राजते दीप्यते यस्माज्जगच्चान्ते दहत्यपि । कालाग्निरूपमास्थाय सप्तार्चिः सह रश्मिभिः ॥ १० ॥
भ्राजते स्वेन रूपेण तस्माद्भर्ग इति स्मृतः । इत्याह याज्ञवल्क्योपि तेनेदं यौगिकं पदम् ॥ ११ ॥
न तत्र गमयेत्किञ्च रूपस्थाननिरूपणात् । रुद्रत्वं कृत्रिमं तस्मात्तदर्थः कृष्ण एव हि ॥ १२ ॥
श्रुतितात्पर्यतः किञ्च 'विष्णुसञ्ज्ञ'मिति श्रुतिः । काचिद्वरेण्यं सवितुर्भर्गं विष्ण्वभिधं जगौ ॥ १३ ॥
याज्ञवल्क्योपि पुरुषं व्योम्नि तद्विष्णुसञ्ज्ञितम् । भइति भासते लोकान् रइति रक्षते प्रजाः ॥ १४ ॥
गइत्यागच्छतेजस्रं भरगाद्भर्ग उच्यते । इत्याह गायत्र्यर्थस्य व्याकृतौ योगशास्त्रके ॥ १५ ॥
अतोपि प्रोक्त एवार्थः सद्भिरादियतां सदा । यच्छिवस्यापि विष्णुत्वं शिखावाक्येन शङ्कितम् ॥ १६ ॥
तन्निरस्तं पूर्वमेव शिखातात्पर्यनिर्णये । यच्च योगेन विष्णुत्वं योगनैर्बल्यतो न तत् ॥ १७ ॥
न चोपबृंहणबलात्तत्सिद्धिस्तत्स्वरूपवान् । तेषु तेषु पुराणेषु हरिर्वै गीयते यतः ॥ १८ ॥
'ध्येयः सदे'ति वाक्येपि पुराणेष्वेवमुच्यते । आदित्यमण्डलासीनं रुक्माभं पुरुषं परम् ॥ १९ ॥
ध्यायन्नपेत्तदित्येतन्निष्कामो मुच्यते द्विजः । आदित्यमण्डलान्तःस्थं परं ब्रह्माधिदैवतम् ॥ २० ॥
छन्दोमयी स्याद्गायत्री मया दृष्टा सनातनी । तथाश्वमेधिके पार्थं प्रत्याह भगवान् स्वयम् ॥ २१ ॥
तन्मण्डलस्थं मां ध्यायेत्तेजोमूर्तिं चतुर्भुजम् । 'उदुत्यञ्च' जपेन्मन्त्रं 'चित्रं' 'तच्चक्षु'रित्यपि ॥ २२ ॥
गायत्रीञ्च यथाशक्ति जह्वा सूक्तञ्च मामकम् । इत्यतो नात्र शङ्कांशस्तेनादित्ये स्थितो हरिः ॥ २३ ॥
सर्वदेवात्मकः सर्वान्तर्यामी ध्यायतां सदा । छन्दोगश्रुतिरप्येतमन्तर्यामिणमाह हि ॥ २४ ॥
अक्षिद्वित्वादिभिर्लिङ्गैस्तदेतदुपपादितम् ॥ २५ ॥
तथैव तैत्तिरीयेपि त्रयीविद्यात्मके रवौ । अन्तर्हिरण्मयो ब्रह्म पुरुषः पठ्यते तथा ॥ २६ ॥
रविमध्ये स्थितः सोमः सोममध्ये हुताशनः । तेजोमध्ये स्थितं सत्त्वं सत्त्वमध्ये स्थितोच्युतः ॥ २७ ॥
रविमध्ये स्थितः सोमः सोममध्ये हुताशनः । अग्निमध्ये स्थितं सत्यं सत्यस्यान्तः स्थितोच्युतः ॥ २८ ॥
इति मैत्रश्रुतिर्योगियाज्ञवल्क्यस्मृतिस्तथा । सर्वोत्तरत्वं कृष्णस्य वदतस्तेन तत्तथा ॥ २९ ॥
यत्तु सन्ध्यासु भगवद्भक्तैर्भास्करमण्डले । उपास्या भगवन्मूर्तिरित्येतावत्परं वचः ॥ ३० ॥
ननु गायत्र्युपास्यत्वपर्यन्तस्थापनक्षमम् । न हि श्रुतिविरुद्धेर्थे तात्पर्यं तस्य युज्यते ॥ ३१ ॥
इत्युक्तं तच्च पूर्वोक्तश्रुतिस्मृतिविरोधतः । तस्मात्षडक्षराद्यर्थध्यानार्थत्वप्रसाधनम् ॥ ३२ ॥
यत्कृतं वचसस्तत्तु मज्जतः फेनधारणम् । यच्च तत्र हि संवादः कृष्णपाण्डुतनूजयोः ॥ ३३ ॥
वैष्णवागमधर्माणां विधानाय प्रवर्तितः । भगवान् वैष्णवा धर्माः किम्फलाः किम्परायणाः ॥ ३४ ॥
कथं त्वमर्चनीयो हि मूर्तयः कीदृशास्तु ते । कथं वैखानसा ब्रूयुः कथं वा पाञ्चरात्रिकाः ॥ ३५ ॥
एवमेव पुरावृत्तं वैष्णवं धर्मशासनम् । इति तत्रादिमध्यान्तवचनैरवसीयते ॥ ३६ ॥

---

१ को वास्य कर्तेति नामनिर्देशाभावान्न निश्चेतुं प्रभूयते, अथापि पंचविंशकारिकाविवरणविस्तारशङ्खशैवखण्डनरूपः कैश्चिच्छ्रीपुरुषोत्तमगोस्वामिनामनुयायिभिरिह तत इति विभाव्यते ।

२ 'अथ इति यो ह वा अमुष्मिन्नादित्ये निहितस्तारकेक्षिणीवैष भर्गाख्यो भाभिर्गतिरस्य हीति भर्गो भर्जयतीति वैष भर्ग इति रुद्रो ब्रह्मवादिनोथ भइति भासयतीमान् लोकान् रइति रञ्जयतीमानि भूतानि गइति गच्छन्त्यस्मादिमाः प्रजास्तस्माद्भरगत्वाद्भर्गः शश्वत्सूयमानात्सूर्यः सवनात्सवितेत्यादि ।

श्रुता मे मानवा धर्मा इति तेभ्यो विविच्य तान् । युष्मदीयान् परान् धर्मान् पुण्यान् कथय मेच्युत ॥ ३७ ॥
इति प्रश्न उपक्रान्तिगतस्तेनाप्यतिस्फुटम् । वेदोक्तानेव तानाहुर्धर्मान्सन्तो मनूदितान् ॥ ३८ ॥
श्रौतान् वर्णाश्रमाचारानुपदिश्य प्रपञ्चतः । इत्येष मानवो धर्मो युष्माकं कथितो मया ॥ ३९ ॥
इत्युक्तिश्चोपसंहारे व्यासगीतासु दृश्यते । प्रसिद्धा च मनूक्तीनां वैदिकाचारनिष्ठता ॥ ४० ॥
तथा च मानवाद्धर्मजातादन्यत्वनिश्चये । विष्ण्वागमस्थिता धर्मास्तत्रोक्ता इति गम्यते ॥ ४१ ॥
यतस्तद्वैष्णवं धर्मशास्त्रमित्यभिधीयते । इति तत्रत्यसंवादमादायागमधर्मता ॥ ४२ ॥
चिन्तिता हि तथा धर्मा मानवेभ्यो विविच्य च । उक्तमागमनिष्ठेन गायत्र्या विष्णुचिन्तनम् ॥ ४३ ॥
कार्यं न वेदनिष्ठैस्तन्मोक्षधर्माद्विरुध्यते । एकं साङ्ख्यं च योगञ्च वेदारण्यकमेव च ॥ ४४ ॥
परस्पराङ्गान्येतानि पञ्चरात्रं च कथ्यते । एवमेकान्तिनां धर्मो नारायणपरात्मकः ॥ ४५ ॥
इत्युक्तं तत्र तस्माद्ये वैदिका देहबन्धनम् । जिहासन्त्येष तद्धर्मो न जडानामितिस्थितिः ॥ ४६ ॥
मानवेभ्यो विवेकोत एतेषान्तदनन्तरम् । शुश्रूषा प्रश्नपुण्यत्वकथनादपि युज्यते ॥ ४७ ॥
मनुर्हि मुनिभिः पृष्टो धर्मान्नानाविधान्बहून् । प्राहाधिकारिभेदेनेत्युक्तं स्कन्धे तृतीयके ॥ ४८ ॥
अतो धर्मा न ते मुख्या याज्ञवल्क्योत एव हि । 'यदुच्यते द्विजातीनां शूद्रदारोपसङ्ग्रहः ॥ ४९ ॥
नैतन्मम मतं यस्मात्तत्रायं जायते स्वयम्' । वदन्नेवं मानवोक्तमपि नाङ्गीचकार ह ॥ ५० ॥
नो चेत्तद्वेषजमितिश्रुतिं पश्यन्कथं वदेत् । तस्मादस्माभिरुक्तं तत्सत्यमन्यत्तु जल्पितम् ॥ ५१ ॥
कचित्तन्त्रानुरोधेन धर्मं पौराणिका अपि । वदन्ति तादृशोंशस्तु ग्राह्यस्तन्त्रावलम्बिनाम् ॥ ५२ ॥
एतत्पराशरपुराणीयवाक्यावलम्बतः । यत्तु तन्त्रानुसारेण कथितं तत्परित्यजेत् ॥ ५३ ॥
धर्मशास्त्रे पुराणे च यत्नतो वैदिको जनः । इति स्मृतिभिरेवात्र व्यवस्थायाः प्रदर्शनात् ॥ ५४ ॥
तस्मादागमनिष्ठानामाचारविवृतावपि । वेदनिष्ठैः सदा कार्यं गायत्र्या शिवपूजनम् ॥ ५५ ॥
इत्येतदपि युष्माकं दूषणायैव निश्चितम् । पुराणे धर्मशास्त्रे च योंशः श्रुत्या विरुध्यते ॥ ५६ ॥
स तत्रार्थस्तु विज्ञेय इति तत्रास्य लक्षणात् । तथा च भर्गशब्दस्य विष्णुसञ्ज्ञत्वबोधिकाम् ॥ ५७ ॥
श्रुतिं त्यक्त्वात्र गायत्र्या या हि शैवत्वकल्पना । पुराणबलतः सैव तत्रार्थ इति हीयताम् ॥ ५८ ॥
शब्दस्य यदिदं तत्त्वं भर्ग इत्यस्य चिन्तितम् । घञमादाय सञ्ज्ञायामकर्तरि च कारके ॥ ५९ ॥
छन्दोबाहुलके नादे उदात्तत्वसमर्थनात् । भर्गाख्यस्तं चिन्तयामीतिमैत्रश्रुतिदर्शनात् ॥ ६० ॥
'तद्भर्गाख्यं किमपि ही'त्येवं साम्बस्तुतेरपि । तन्न युक्तं शकन्ध्वादिपररूपे कृते सति ॥ ६१ ॥
भर्गाख्येति प्रयोगस्य विनायासेन सम्भवात् । न वा तलवकाराणामिति ब्राह्मणदर्शनात् ॥ ६२ ॥
सिद्धिः पृषोदरादित्वे सलोपादस्य सम्भवात् । अतो ज्ञानघनेनोक्तं फल्गु तद्वदिदं मतम् ॥ ६३ ॥
तस्माददन्ततैतस्यैकान्ततो नैव सिध्यति । तेन व्यत्ययमालम्ब्य तथैव च समर्थना ॥ ६४ ॥
प्रयोगस्य तृतीये च पादेस्याप्यन्वयो मुधा । द्वितीयपादविवृतावतो मैत्रायणश्रुतिम् ॥ ६५ ॥
'तं चिन्तयामि भर्गाख्य'मिति तस्यान्वयं जगौ । तेन भर्गस्तत्पदयोः सुपो लुगवबोधितः ॥ ६६ ॥
अतो यदुक्तं सवितुर्वरेण्यमिति विश्रुतः । श्रुतौ मैत्रायणीयानामन्वयः फल्गु तद्यतः ॥ ६७ ॥
पूर्वपादप्रतीकं तद्विवरीतुमुदाहृतम् । न त्वन्वयाय येनाग्रे तत्रोक्तो दर्शितोन्वयः ॥ ६८ ॥
'तदक्षरं तत्सवितुर्वरेण्य'मिति यच्छ्रुतम् । श्वेताश्वतरमन्त्रे तद्वरेण्यत्वाय बुध्यताम् ॥ ६९ ॥
एवं याजुषमन्त्रेपि पूर्वपादो निरूपितः । फलार्थं ब्राह्मणे प्राह प्रसूत्यामितिबोधनात् ॥ ७० ॥
अतोन्वयो निराबाधः क्रमतः पादयोर्द्वयोः । श्रौतत्वात्कल्पना वाग्भिर्नैव न्यक्कारमर्हति ॥ ७१ ॥
अथ चेदपिभिर्दृष्टमदन्तत्वं तदास्तु तत् । न तु तेन व्यवसितं युष्माकं सिद्धिमेष्यति ॥ ७२ ॥
भर्गान्वयस्तृतीये चेत्पादे दृष्टस्तथाप्यसौ । औदुम्बरीवेष्टनवद्वेदक् सन्मानमर्हति ॥ ७३ ॥
अथ वास्तामियं चिन्ता येन्वया भवतोदिताः । तेपि सन्तु तथाप्येतैर्भवदिष्टं न सिध्यति ॥ ७४ ॥
भर्गशब्दस्य सान्तत्वेदन्तत्वे वापि लिङ्गिता । साधारणा तेन मुक्ताग्रहैरुक्तं विभाव्यताम् ॥ ७५ ॥
एवं सत्यत्र सवितृशब्दो नादित्यवाचकः । किन्तु ब्रह्मैव परमम्[2] ॥ ७६ ॥

१ "कः सविता का सावित्री इत्युपक्रम्य द्वितीयः पादो भर्गमयः ।"

२ इयानेव ग्रन्थ उपलब्धः ।

## ॥ अथ श्रीमठेशेन्दिरेशविरचितं गायत्र्यर्थविवरणम् ॥

**श्रीवल्लभं नमस्कृत्य तद्वाचं तत्सुतद्वयम् । इन्दिरेशः करोत्येतां गायत्रीविवृतिं स्फुटाम् ॥ १ ॥**

अथ यजुर्वेदान्तर्गतब्रह्मप्रपाठकीयगायत्रीव्याख्या विव्रियते, तत्रादावोङ्कारस्य वेदमूर्धन्यमणित्वात् षष्ठप्रपाठके प्रणव एव सम्मुखीकृतः, तथा हि 'ओमित्येतदक्षरं चैतत्तस्मादोमित्यनेनैतदुपासीते'ति, अस्यार्थः, अनेन गायत्रीमन्त्रेण सहैतदोमुपासीत, अनेन ओङ्कारस्य मुख्यत उपासनमुक्तं, यद्वा, अनेन प्रणवेनैतद्वक्ष्यमाणं गायत्रीमन्त्रमुपासीतेति तत्रापि 'अजस्रमित्येकोस्य सम्बोधयितेत्येवं ह्याहे'ति श्रुत्यास्य वक्ष्यमाणस्यायं प्रणवः सम्बोधयितेत्याह, देव इत्यर्थः, एतदग्रे पुण्योक्तिरपि 'एतदेवाक्षरं पुण्यमेतदेवाक्षरं परम् । एतदेवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तदि'ति, अनेन रहस्यमेव फलमुक्तं, किञ्च, वेदमूर्धन्यमणौ प्रणवे सर्वदेवादिसमासध्यानमपि 'अथ ब्रह्मा रुद्रो विष्णुरित्यधिपतिमत्येषे'त्यादि, 'ऋग्यजुःसामेति विज्ञानवत्येषा' 'गार्हपत्यो दक्षिणाग्निराहवनीय इति मुखवत्येषे'ति सर्ववेदाग्निदेवालम्बन-रूपेयमक्षरत्रयी प्रणवाख्येत्यर्थः, प्रणवोच्चारानन्तरं भूर्भुवः स्वरित्युच्चारणञ्च यथा प्रपाठके, 'अथ भूर्भुवः स्वरिति लोकवत्येषा', 'अथ भूतं भव्यं भविष्यदिति कालवत्येषा' 'अथ प्राणोग्निः सूर्य इति प्रतापवत्येषाथे'त्यादि प्राणापानव्यान-बुद्धिमनोरूपेयमक्षरत्रयपूर्विका गायत्रीव्याहृतिरित्यर्थः, तत्र गायत्रीत्यस्य निरुक्तिरग्निपुराणे कथ्यते, तथा हि 'गायत्र्युक्थानि शास्त्राणि भर्गः प्राणांस्तथैव च । ततः स्मृतेयं गायत्री सावित्री अत एव च ॥ प्रकाशिनी सा सवितुर्वा-ग्रूपत्वात्सरस्वती', एतानि गायतीति गायत्री, त्रयीमयस्य प्रकाशिनी ज्ञापिका तस्मात्सावित्री, वाग्रूपत्वात्सरस्वतीत्यर्थः, अतो गायत्र्या एव तद्रूपमिति ब्रह्मवत्, एवं गायत्रीपदस्य निरुक्तिं प्रतिपाद्य पूर्वोक्तप्रपाठकीयविवृतिद्वारेणैवाग्रिम-तमर्थमाह, तत्र प्रणवेनाभेदमुक्त्वा व्याहृतिभिरभेदं विशेषेणाह, तथा च प्रपाठके 'अथ व्याहृतं वा इदमासीत्स सत्यं प्रजापतिस्तपस्तप्त्वानुव्याहरत् भूर्भुवःस्वरित्येषा हि वास्य प्रजापतेः स्थविष्ठा तनूर्या लोकवती स्वरित्यस्याः शिवो नाभिर्भूः पादा आदित्यश्चक्षुश्चक्षुरायत्ता हि पुरुषस्य महतो मात्राश्चक्षुषा ह्ययं मात्राश्चरति सत्यं वै चक्षुरक्षिण्यवस्थितो हि पुरुषः सर्वार्थेषु चरत्येतस्माद् भूर्भुवः स्वरित्युपासीतेत्यनेन प्रजापतिर्विश्वात्मा विश्वचक्षुरेवोपासितो भवति इत्येवं ह्याह वै प्रजापतिर्विश्वभृदन्तरेतस्यामिदं सर्वमन्तर्हितमस्मिंश्च सर्वस्मिन्नेषान्तर्हितेति तस्मादेतामुपासीते'ति श्रुत्या-भेदोक्तेः, एवमभेदेन सर्वत्र ब्रह्मस्फूर्त्याश्रितत्वमुक्त्वा गायत्रीमन्त्रार्थमाहाग्रे प्रपाठके, तत्र 'को वा सविता किं वरेण्य-मि'त्याकाङ्क्षायां निश्चित्य तदाह, यथा च श्रुतिः 'तत्सवितुर्वरेणीयमित्यसौ वा आदित्यः सविता स वा एवं प्रवरणीय आत्मकामेनेत्याहुर्ब्रह्मवादिनोथ भर्गो देवस्य धीमहि सविता वै देवस्ततो योस्य भर्गाख्यस्तं कं चिन्तयामीत्याहुर्ब्रह्म-वादिनोथ धियो यो नः प्रचोदयादिति बुद्धयो वै धियस्ता योस्माकं प्रचोदयादित्याहुर्ब्रह्मवादिनोथ भर्ग इति यो ह वामुष्मिन्नादित्ये निहितस्तारकोक्षिणी वैष भर्गाख्यो भाभिर्गतिरस्य हीति भर्गो भर्जयतीति वैष भर्ग इति रुद्रो ब्रह्मवा-दिनोथ भ इति भासयतीमाँल्लोकान् र इति रञ्जयनीमानि भूतानि ग इति गच्छन्ति चास्मिन्नागच्छन्ति चास्मादिमाः प्रजा-स्तस्माद्भरगत्वाद्भर्गः शश्वत्सूयमानत्वात्सूर्यः सवनात्सविता दानादादित्यः पवनात्पवनोथाप आप्यायनादित्येवं ह्याह खल्वा-त्मनामात्मामृताख्यश्चेता मन्ता गन्तोत्स्रष्टा नन्दयिता वक्ता रसयिता द्रष्टा घ्राता श्रोता स्पर्शयिता च विभर्त्यदो त्रिविष्टपे-त्यादौ सर्वात्मा परमात्मैव सवितेति तद्भर्ग' इति निश्चित्य अग्रेन्यनिराकरणपूर्वकं परमात्मानमेव सर्वरूपमभिजानाती-त्याह श्रुतिः, तत्र द्वैताभासं निगद्य परमात्मस्वरूपं निगदति उपदिशतीति, 'अथ यत्र द्वैतीभूतं तत्र हि शृणोति पश्यति जिघ्रति रसयते चैव स्पर्शयति सर्वमात्मा जानाती'ति 'यत्र द्वैतीभूतं विज्ञानं कार्यकारणकर्मनिर्मुक्तं निर्वचनमनौपम्यं निरुपाख्यं किन्तदवाच्य'मिति स्वरूपं यथाशक्तित्वेनोक्त्वा तत्र देवतारूपभेदे 'सर्वं खल्विदं ब्रह्मे'त्यादिश्रुत्यन्तरसामा-नाधिकरण्येन ब्रह्मणोभेदमेवोपपादयति श्रुतिः, 'सत्यं प्राणो हंसः शास्ता विष्णुर्नारायणो देव' इति तन्नामानि निर्दिश्य तत्तदेव रूपत्वमपि तस्यैव न तद्व्यतिरिक्तं किञ्चित्तदेव सर्वरूपमिति निरूपयति श्रुतिः, 'अथार्कः सविता धाता सम्राट् इन्द्र इन्दुरिति य एष तपत्यग्निना पिहितः सहस्राक्षेण हिरण्मयेनायमेष वा विजिज्ञासितव्योन्वेष्टव्यः सर्वभूतेभ्योभयं दत्वारण्यं गत्वाव बहिष्कृत्येन्द्रियार्थान् स्वान् शरीरादुपलभेतैनमिति विश्वरूपं हिरण्यं जातवेदसं परायणं ज्योतिरेकं तपन्तं सहस्ररश्मिः शतधा वर्तमानः प्राणाः प्रजानामुदयत्येषः सूर्यः सोयं विष्णुर्नारायण' इत्यभेदं तन्मध्यवर्तित्वेन व्यतिरेकेणैवोपदिशतीत्यर्थः, एवमभेददर्शनेन पूर्वोक्तस्य देवस्य विष्णोः परमात्मनः दिवुधातोस्ते-जोर्थकत्वाज्ज्योतीरूपस्य सवितुरिति वेदोक्तनिरुक्त्या तत्तद्रूपेण वा सवितुः षूङ् प्राणिप्रसवे इति धातोः, तस्य तद्भर्गः तं भर्गं धीमहि इति तदव्ययत्वादनियतलिङ्गविभक्तित्वं, 'नित्यं शुद्धं बुद्धमेकं ध्येयं भर्गमधीश्वरम् । अहं ब्रह्म परं धाम ध्यायेमहि विमुक्तये' इत्यग्निपुराणोक्तेः, अत्र जापकस्यैकत्वेपि बहुवचनत्वं बहुवचनक्रियान्यापेक्षया, श्रीभागवते चतुर्थस्कन्धे पृथुचरिते सनत्कुमारवचनात्, अथैवं भर्गशब्दस्यादन्तत्वे सिद्धे मन्त्रेप्येवं व्याख्येयं, तेन 'सुपां सुलुगि'-ति छान्दसेन सूत्रेण द्वितीयैकवचनस्यामः सुत्वादेशात्तत्सिद्धिः, अत एव य इत्यग्रे पुँल्लिङ्गकः, ततो 'भर्जयत्यखिलाविद्या'-मिति श्रुत्युक्तनिरुक्त्या तेजोमयरूपमेव ध्येयं, वेदोक्तनिरुक्त्यन्तरेणापि तेजोमयरूपत्वस्यैव कथनमिति ज्ञायते, अनेन शाक्तत्वशङ्कापि निरस्ता ॥

अथ शाक्तत्वं नाम शक्त्युपासकत्वं तज्जन्यत्वं वा? नान्त्यः, तथाप्रसङ्गनिरूपणाभावात्, नाद्यः, सेव्यस्य तद्रूपत्वानुक्तेः, अथोपासनमपि कस्य तावद्गायत्र्यास्तत्प्रतिपाद्यदेवस्य वा? नाद्यः, तस्य मन्त्ररूपतयाक्षरसन्दोहमयत्वात्, नान्त्य इति वक्तुं न शक्यते, इष्टापत्तेः, तत्प्रतिपाद्य एव परमात्मा श्रुतिप्रतिपाद्यो विष्णुरिति तदुपासने न शाक्तत्वशङ्केति सर्वं समञ्जसम् ॥

प्रस्तुतमाह, कीदृशं भर्गं? वरेण्यं श्रेष्ठं वरणीयं च, न च विधेरनुपलम्भ इति वाच्यं, वेदे 'उपासीते'ति कथनात्, तेन वरणीयमिति सुष्ठूक्तं, श्रेष्ठार्थतापक्षे तु सर्वेषां तेजसां प्रकाशकानां प्रकाशकत्वेन प्रकाशकत्वमिदमपि सम्यक्, यद्वा, भर्गस्य रूढ्या श्रेष्ठत्वमुक्त्वा योगवृत्त्या सर्वतः प्रार्थनीयत्वं दर्शयति वरणीय इति, वृणोतेर्वरणार्थत्वात्, एवं ज्ञात्वा तं धीमहि ध्यायेम इत्यर्थः, अत्रैकवचनविवक्षायां बहुवचनमार्षत्वादुपपन्नं, प्रपाठके चैतादृशार्थदर्शनात्, तथा हि 'अथ भर्गो देवस्य धीमहि सविता वै देवस्ततो योस्य भर्गाख्यस्तं चिन्तयामीत्याहुर्ब्रह्मवादिन' इति, यद्वा धीमहीति न केवलमहमेव ध्यायेयं किन्तु सर्व एव वयं जीवा ध्यायेमेति सर्वोपकारत्वेन ध्यानार्थः धीमहीति छान्दसं रूपं, यद्वा, बहुवचनाङ्गीकारे धीमहीत्यस्य धात्वन्तरप्रकृतत्वेन धारणार्थ एवेति वक्तव्यं, दधातेर्धीमहीति मनसा धारयेमहीत्यग्रिमोक्तदर्शनात्, तत्र चाहमिति कर्तृपदोपलम्भनवशादयमेवार्थः साधीयानित्यपि युक्तिं दर्शयति तदसत्, गायत्रीमन्त्रे तथा यौक्तिकव्याख्यानासम्भवात्, धीत्यस्य पदत्वाघटनाच्च, इदानीं प्रपाठकानुसारेणाग्रिममर्थं व्याचक्षते, 'अथ धियो यो नः प्रचोदयात्' इति, बुद्धयो वै धियस्ता नोस्माकं प्रचोदयात् इत्याहुर्ब्रह्मवादिन' इति, तं कीदृशमित्यपेक्षायां तत्कार्यविशेषणमाह, यत्तदोर्नित्यसम्बन्धः, यो भर्गः भर्गशब्दवाच्यं पूर्वोक्तं यत्तेजोरूपं, नोस्माकं, बहुवचनमत्र पूर्वोक्ताभिप्रायेणैव, धियो बुद्धीः, प्रेरयेदिति सम्बन्धः, अत्र बहुवचनं वृत्त्यभिप्रायेण, वरणीयमिति 'तन्वादीनां वेयङुवङा'विति छान्दससूत्रेण वैकल्पिके यङा सिद्धं रूपं, तेन चतुर्विंशत्यक्षरत्वमपीति, किञ्च 'ब्रह्मवादिन इत्याहु'रित्यादि यदुक्तं प्रपाठके तस्यायं भावः, 'सर्वं खल्विदं ब्रह्म' 'ऐतदात्म्यमिदं सर्व'मित्यादिश्रुतिसहस्रैर्ब्रह्मातिरिक्तं किमपि नास्तीति यद्दृश्यते तत्सद्ब्रह्मेति वदन्ति विबुधास्त एव ब्रह्मवादिनः शुद्धाः, अतोत्र प्रपाठके सूर्यरुद्रेन्दुशक्रादिदेवेष्वपि ब्रह्मरूपतैव नहि ब्रह्मातिरिक्तास्त इत्यभेदोक्त्यैव ब्रह्मवादो निर्वृत्त इति ज्ञायते, इदन्तु **श्रीमदाचार्य**चरणादिभिर्विशेषतः स्वग्रन्थेषु दर्शितमेवेत्युपरम्यते, मया **ब्रह्मवादमतदीपिकायां** व्याख्याने ब्रह्मवाद एव सर्वशास्त्रसिद्धतया दृढीकृतो दर्शित इति ग्रन्थविस्तरभिया नात्र लिख्यते इत्यलं, अन्यथा 'ब्रह्मवादिन' इति पदं प्रपाठके सम्मततया प्रदत्तं वैयर्थ्यमापद्येत, अतो ज्ञायते श्रुतिरपि विप्रतिपद्यमानत्वेन दृश्यमानान् देवान् स्वमतसात्करोतीति, अन्ते च नारायण एव मूलतो निर्धारितः 'सत्यं प्राणो हंसः शास्ता विष्णुर्नारायण' इत्युक्त्वा 'यत्र द्वैतीभूतं विज्ञानं कार्यकारणकर्मनिर्मुक्त'मित्यादिना, तेन सर्वं ब्रह्म न तदतिरिक्तं किञ्चित्, अत एव **श्रीभागवते** षष्ठस्कन्धे 'यस्मिन् यतो येन च यस्य यस्मै यद्यो यथा कुरुते कार्यते वे'ति 'स सर्वनामा स च विश्वरूप' इति च, अनेन प्रपञ्चस्य ब्रह्मरूपत्वमेवोक्तं दर्शितं चेत्यलमतिकथनेन ॥

अथवा गायत्र्या अयमर्थः, ज्ञानमर्यादया तदुक्तो भक्तिपुष्ट्या तदाह, तत्र रासलीलामध्यगतश्रीनन्दनन्दनस्य कृष्णस्य ध्यानमुच्यते, सवितुः रसप्रसवितुरलौकिकरसोत्पादकस्य 'रसो वै सः' 'रसꣳ ह्येवायं लब्ध्वानन्दीभवति' इत्युक्तो रसस्तत्सवितुस्तस्य, देवस्य रासक्रीडाकर्तुः, दिवुधातोः प्रथमं क्रीडार्थस्योपात्ततया मुख्यं तदर्थकत्वमिति, अत एतादृशस्य कृष्णस्य तत प्रसिद्धं, तं वा, भर्जयत्यविद्यादीनि इति तथाभूतं रूपं ध्यायेमेति सम्बन्धः, निजदर्शनस्य अविद्यादिकामभर्जकत्वं स्वेनैवोक्तं, तथा च **श्रीभागवते** दशमे 'न मय्यावेशितधियां कामः कामाय कल्पते। भर्जिता क्वथिता धाना प्रायो बीजाय नेष्यते' इति, इदानीं तद्रूपस्य असाधारणधर्ममाह, योस्माकं जीवानां धियो बुद्धिवृत्तीः प्रचोदयात् क्षोभिताः कुर्यात्, यद्वा धिय इति बहुवचनं चतुर्विधान्तःकरणाभिप्रायेण, यद्वा य इति श्रीकृष्णविशेषणेन यः अस्माकं मनसः क्षोभकः तस्य सवितुर्भर्गं ध्यायेमेति बहुवचनं सर्वेन्द्रियाभिप्रायेण वा, यद्वा योस्मन्मनसः क्षोभकः तद्रसोत्पादकस्य भर्गं ध्यायेमेति, यद्वा रासमध्ये देवस्य द्योतमानस्य, भर्गं ध्यायेमेति, एवमनेकधा व्युत्पादनेन सर्वेषामाब्रह्मस्तम्बपर्यन्तानां श्रीकृष्णे भगवति समन्वय इति तेन ध्यानमेव निर्दिष्टं, 'कृष्णस्तु भगवान् स्वय'मिति प्रथमे, 'आद्यं कृष्णसञ्ज्ञं नतोस्मी'त्येकादशे, उक्तञ्च **श्रीवल्लभाचार्यचरणैः** 'आत्मानन्दसमुद्रस्थं कृष्णमेव विचिन्तयेत्' इति 'स्वनेभ्यो गोपिकावृन्दे क्रीडन् वृन्दावने स्थित' इति च, 'ज्ञानाधिको भक्तिमार्ग' इति च, पुनः 'ज्ञाने प्रयासमुदपास्य नमन्त' इति तात्पर्येण भक्तिपक्षीयार्थस्यावसरत्वादयमेवार्थः शोभन इत्यलं प्रागल्भ्येन ॥

आम्नायामृतसिन्धुमन्थनपरैर्व्यासैः सुरर्ष्याज्ञया, श्रीमद्भागवतादिमान्तिमलसत्पद्याद्ययो भावुकैः ।
गायत्रीप्रतिपाद्यरूपममलं नीलं महो दर्शितं, रे रे ध्यायत मायतान्धविवरं यातुं कुरुध्वं मनः ॥ १ ॥

श्रीवल्लभपदाम्भोजमधुमत्तहृदा मया ।
य उद्गारः कृतस्तं तु क्षन्तुमर्हन्तु सूरयः ॥ २ ॥

**इति श्रीमदीश्वरश्रीवल्लभचरणानुचरेणेन्दिरेशेन कृतं गायत्र्यर्थविवरणं समाप्तम् ॥**

---

१ आदर्शान्तराभावाद्यथालिखित एवासौ मुद्रितः ।

## भारतमार्तण्डवेदान्तभट्टाचार्यगोवर्धनभट्टविरचितः

# ॥ गायत्र्यर्थः ॥

परं ब्रह्म निजाचार्यान् विठ्ठलेशान्गुरून् नमन् ।
तदुक्तं व्याहृतिशिरोगायत्र्यर्थं लिखाम्यहम् ॥ १ ॥

तत्र भूरादिषु सप्तव्याहृतिषु भूर्भुवःस्वरिति तिस्र एव प्रणवपूर्विका जपे पठ्यन्ते, अकारादिप्रणवमात्रात्रयस्य भूरादिव्याहृतित्रयस्य गायत्रीपादत्रितयस्य च समानकारणकत्वात्, तथा च मनुः (अ. २, श्लो. ७५, ७६) 'अकारं चाप्युकारं च मकारं च प्रजापतिः । वेदत्रयान्निरदुहद्भूर्भुवःस्वरितीति च' 'त्रिभ्य एव तु वेदेभ्यः पादम्पादमदूदुहत् । तदित्यृचोस्याः सावित्र्याः परमेष्ठी प्रजापतिः' इति समानकारणकत्वमभिधायानुपदं प्रणवव्याहृतित्रययुक्ताया एव जप्यत्वमाह, 'एतदक्षरमेतां च जपन् व्याहृतिपूर्विकाम् । सन्ध्ययोर्वेदविद्विप्रो वेदपुण्येन युज्यते' तथाग्रेपि 'ओङ्कारपूर्विकास्तिस्रो महाव्याहृतयोव्ययाः । त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुख'मिति किञ्च, 'भूरादित्रिलोक्याः साधनमग्निवाय्वादित्यानामृक्सामयजुषां स्मरणस्वीकरणे प्राणापानव्यानानां शोधनं च व्याहृतित्रयेणैव सम्पत्स्यत इति तदर्थमपि गायत्र्यादौ जपे व्याहृतित्रयग्रहणं, प्रणवग्रहणं तु 'स्रवत्यनोङ्कृतं ब्रह्मे'ति श्रुतिस्मृत्योस्तत्त्यागे नैष्फल्याभिधानात्, व्याहृतीनां लोकाद्युक्तचरार्थकत्वं तु तैत्तिरीयाणां शिक्षोपनिषदि 'भूरिति वायं लोकः भूरिति वा अग्निः भूरिति वा ऋचः भूरिति वै प्राण' इत्यादिना स्फुटमाम्नातं, एतासां व्याहृतित्वं तु निरुच्यते योगिना, 'भूर्भुवःस्वस्तथा पूर्वं स्वयमेव स्वयंभुवा । व्याहृता ज्ञानदेहेन तेन व्याहृतयः स्मृता' इति, तथा च (स्कं. २ अ. ५. श्लो. ४२) 'भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोस्य नाभितः । स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पने'ति भागवतोक्तं पक्षमाश्रित्य व्याहृतित्रयेणैव लोकात्मकं सकलं भगवद्रूपमपि गायत्र्यारम्भे स्मृतं भवति, अथ प्रणवसंमिश्रिततया व्याहृतीनामर्थाङ्गीकारे तु ओं भूर्भुवःस्वरिति पूर्वोक्ता भूराद्यर्थाः सर्वे ओं ब्रह्मैवेत्यर्थः, प्राणायामे तु 'भूः भुवः सुवः महः जनः तपः सत्यमि'ति सप्त व्याहृतयः, 'सप्तव्याहृतिपूर्वां तु गायत्रीं शिरसा सह । त्रिः पठेदायतप्राणः प्राणायामः स उच्यते'. इति स्मरणात् ।

अथैतासामर्थो निरूप्यते, प्रणवं त्वग्रे व्याख्यास्यामः, तत्रैतासां प्रसिद्धोर्थस्तु भूरादयो ब्रह्मलोकान्ताः सप्तलोकास्तेषां 'ओं भूर्भुवःस्वः' इत्यादिप्रणवपूर्वकनिर्देशात्, प्रणवस्य च 'ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत' इति स्मृत्या ब्रह्मवाचकत्वात् ब्रह्मैव भूः अयं लोकः ब्रह्मैव भुवः अन्तरिक्षलोकः एवं सप्तानामुत्तमलोकानां ब्रह्मरूपत्वं वाक्यसप्तकत्वेनाभिधीयते, एवं ध्यानाच्च सत्त्वशुद्धावुत्तमश्लोकप्राप्ति'स्तदोत्तमविदां लोकानमलान् प्रतिपद्यते' 'ऊर्ध्वं गच्छन्ति सत्त्वस्था' इत्यादि स्मरणेभ्यः, किञ्च तत्त्वे विमृश्यमाने भूरादिषड्व्याहृतिभिरैश्वर्यादयो भगवच्छब्दाभिधेयाः षड् गुणाः सप्तम्या च धर्मिस्वरूपमभिधीयत इत्यवगम्यते, ते गुणास्तु विष्णुपुराणे निर्दिष्टाः 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणे'ति, तत्र भूरिति प्रथममैश्वर्यमुच्यते, भुवः सर्वाधारत्वात्, 'गामाविश्य च भूतानि धारयाम्यहमोजसे'ति 'यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर' इति धारणस्येश्वरधर्मत्वात्, भुवरिति वीर्यं बोध्यते, 'भुवरित्यन्तरिक्ष'मिति श्रुत्यान्तरिक्षवाचकत्वात्, 'तेन्तरिक्षमजय'न्निति श्रुत्या तस्य रुद्रप्रभुकत्वावगमात्, 'रुद्रान् वीर्यकामोथ वीर्यवानि'ति द्वितीयस्कन्धीयवाक्येन तस्यापि रुद्रप्रभुकत्वावधारणात्, सुवरिति श्रीः, स्वर्गपर्यायत्वात्, तैत्तिरीयाणां सप्तमाष्टके द्वात्रिंशद्रात्रसत्रप्रसङ्गे 'श्रीर्हि मनुष्यस्य स्वर्गो लोक' इत्याम्नानात्, भगवत्सेवकानान्देवानां तत्रोत्कर्षादपि तस्य श्रीत्वमुचितं, 'श्रियो हि परमा काष्ठा सेवकास्तादृशा यदि' इति तल्लक्षणात्, महरिति यशः, लोकशास्त्रयोस्तस्य अपेक्षयोत्तमत्वात्, महर्लोकस्यापि भगवद्यशोंशरूपत्वात्, यशःप्रकाशेनैव तेजोमयत्वमत एव 'महः पुच्छं प्रतिष्ठे'ति मुक्तजीवप्रतिष्ठात्वं तस्य श्राव्यते, जन इति वैराग्यं तापापहत्वात्, 'यान्त्युष्मणा महर्लोकाज्जनं भृग्वादयोर्दिताः । जनं प्रयान्ति तापार्ता महर्लोकनिवासिन' इत्यादिवाक्येभ्यः 'स्वायम्भुवब्रह्मसत्रं जनलोकेभवत्पुरे'त्यादिप्रसङ्गेषु तत्र वैराग्योत्कर्षसंसारतापहानयोरप्यवगमाच्च, तप इति ज्ञानं 'यः सर्वज्ञः यः सर्वविद्यस्य ज्ञानमयं तपः' इत्याथर्वणानां प्रथममुण्डके श्रवणात्, आनन्दवल्ल्यां 'स तपो तप्यते'त्यादावपि तथाङ्गीकाराच्च, सत्यमिति धर्मीभूतं परं ब्रह्म, 'सत्यं परं परं सत्य'मिति बृहन्नारायणोपनिषद्याम्नानात्, 'सत्यं ज्ञानमनन्तं ब्रह्म' 'सत्यं विज्ञानमानन्दं ब्रह्मे'त्यादिश्रुत्यन्तरेभ्यश्च, द्वितीयस्कन्धे भूरादिलोकानां तत्तद्भगवदवयवत्वस्मरणात् प्रकृतेपि उदितरीत्या सर्वेषां ब्रह्माभेदबोधनाच्च सर्वमनवद्यम् ।

अथ गायत्री व्याख्यायते, तत्रोत्तानार्थस्तु 'सवितुः जगज्जन्मादिकारणस्य देवस्य विविधसर्गादिक्रीडावतः सर्वज्ञस्य तल्लोकवेदप्रसिद्धं वरेण्यं वरणीयं भर्गः अविद्याभर्जकं स्वरूपं धीमहि ध्यायेम यो देवः नोस्माकं धियः बुद्धिं तदुपलक्षितसर्वेन्द्रियाणि च प्रचोदयात् प्रकृष्टरीत्या प्रेर्यादित्याशीः, अथ प्रतिपदं सप्रमाणोर्थः, तत्र सर्वनाम्नां

INDIAN INSTITUTE OF ADVANCED



बुद्धिस्थपरामर्शकत्वात्तदः प्रसिद्धार्थकत्वाच्च तदिति लोकवेदप्रसिद्ध'मतोस्मि लोके वेदे च प्रसिद्धः पुरुषोत्तमः' इति गीतोक्तं परब्रह्मरूपमुच्यते, एतदेव भागवतारम्भे 'सत्यं पर'मिति निर्दिष्टं सत्यमिति लोके परमिति वेदे प्रसिद्धेः, सवितृपदमपीश्वरपरमेव, शास्त्रोक्तनिरङ्कुशजगत्कारणस्वरूपब्रह्मलक्षणस्योत्तरमीमांसायां द्वितीयतृतीयाधिकरणयोः साधनात्, 'तस्माद्वा एतस्मात्' 'यतो वा इमानि भूतानि' इत्यादिश्रुत्यन्तरेभ्यश्च, सूर्येपि 'ज्योतिषां रविरंशुमान्' इति तदंशतयैव तत्त्वप्रसिद्धेश्च, 'आदित्यमण्डलान्तःस्थं परं ब्रह्माधिदैवतम् । छन्दोनिवृत्त्या गायत्री मया दृष्टा सनातनी'ति स्मृत्यन्तरेणापि गायत्र्या नारायणपरत्वं तत्परत्वञ्च बोध्यते, वरेण्यं वरणीयं, 'तत्सवितुर्वरेण्यमित्यसौ वा आदित्यः सविता स वा एवं प्रवरणीय आत्मकामेनेत्याहुर्ब्रह्मवादिन इति' मैत्रश्रुतेः, 'वरेण्यं वरणीयन्तु जन्मसंसारभीरुभि'रिति योगिस्मरणाच्च, तेन 'यमेवैष वृणुते तेन लभ्य' इति कठमुण्डकयोः श्रावितदिशा लाभो बोधितः, निर्दोषपूर्णगुणविग्रहत्वादपि वरेण्यत्वं निर्विवादं, भर्ग इत्यविद्याभयकामादिभर्जकं तेजः, 'भर्जयत्यखिलामविद्या'मिति स्मरणात्, मैत्रश्रुतौ 'अथ भर्गा इति यो ह वा अमुष्मिन्नादित्ये निहितस्तारकोक्षिणीवैष भर्गाख्यो भाभिर्गतिरस्य हेति भर्गो भर्जयतीति वैष भर्ग इति रुद्रो ब्रह्मवादिनोथ भ इति भासयति इमान् लोकान् र इति रञ्जयति इमानि भूतानि ग इति गच्छन्त्यस्मिन्नागच्छन्त्यस्मादिमाः प्रजास्तस्माद्भरगत्वाद्भर्ग' इत्युक्तत्वाच्च, एतेन प्रतिबन्धकभर्जनात् सोश्नुते सर्वान् कामानि'त्यादिप्रतिपादितमोक्षसिद्धिः सूचिता, भर्गःशब्दश्चायं सान्तः, अदन्तत्वे हि धीमहीत्येतत्कर्मत्वानुपपत्तेः, शिष्टास्तु सवितृवरेण्यभर्गश्शब्दैर्ब्रह्मविष्णुरुद्रात्मकत्वमप्युक्तप्रायमित्याहुः, देवस्येति क्रीडाद्यर्थकदिवुधातुनिष्पन्नत्वात् 'अत्र सर्गो विसर्गश्चे'त्यादिना भागवतोक्तदशविधलीलावैशिष्ट्यं यथायोग्यं धर्मान्तरे 'द्युस्थानो भवती'त्यपि निरुक्ते व्यापिवैकुण्ठस्थायित्वं च देवशब्देन सङ्गृहीतं, अत एव योगिनाप्युक्तं 'दीप्यते क्रीडते यस्मादुद्यते द्योतते दिवि । तस्माद्देव इति प्रोक्तः स्तूयते सर्वदैवतै'रिति, धीमहीति ध्यानस्य 'ततस्तु तं पश्यते निष्कलं ध्यायमान' इति मुण्डकादिश्रुतिषु 'ध्येयः सदे'त्यादिस्मृतिषु च मुख्यसाधनत्वाभिमानात्, तदेवोक्तं तृतीयपादे जीवस्य स्वतोयोगित्वात् ध्रुवादिवत् बुद्धिप्रेरणं प्रार्थ्यते, ध्रुवादीनामपि 'योन्तः प्रविश्य मम वाचमिमा'मित्यादौ, तत्प्रसिद्धप्रपञ्चविस्मरणपूर्वकभगवदासक्तिसिद्ध्ये धीशब्दोपलक्षितसर्वेन्द्रियप्रेरणं प्रार्थ्यते, बहुवचनान्यथानुपपत्त्योपलक्षकत्वावगमः, वाञ्छाधिकफलदानबोधनाय प्रशब्दः, प्रेरणस्यापि दुर्लभत्वादाशीरर्थकलकारप्रयोगः, अनया विद्यया सूचिसूत्रन्यायेन भगवति चित्तं निवेशयत इति ज्योतिश्चरणाधिकरणे निरणायि श्रीवादरायणचरणैः ।

अथ 'ओमापोज्योतीरसोमृतं ब्रह्म भूर्भुवः स्वरो'मिति गायत्रीशिरः, तस्यायमर्थः, आपः श्रद्धा, छान्दोग्यबृहदारण्यकयोः पञ्चाग्निविद्यायां निष्कामज्योतिष्टोमादिकर्तॄणां मोक्षार्थशरीरोत्पादकसंस्कृतपञ्चभूतोपलक्षिकाः प्रसिद्धाः, इदञ्च चतुर्लक्षण्यां तृतीयाध्यायप्रथमपादारम्भे स्फुटं, तथा लौकिकान्यपि जलानि शुद्धिजनकानि धर्मसाधनानि आप इति पदेन सङ्गृह्यन्ते, ज्योतिस्त्वादशाधिकारिणां क्रममुक्तौ प्राप्यं वैद्युतादिलोकरूपं, तथा रात्रौ दिवसे च धर्मसाधनमग्निसूर्यादिरूपं तेजोप्यत्र ज्योतिःशब्देन सङ्गृह्यते, आपो ज्योतिश्च ब्रह्मैव, एतेन धर्मसाधनानां निष्कामधर्मस्यावान्तरफलानां च ब्रह्मत्वमुक्तं, परमफलस्यापि तत्त्वमाह 'रसोमृतं ब्रह्मे'ति, 'रसो वै स' इति श्रुतौ निर्दिष्टः 'यतो वाच' इत्यग्रिमवाक्ये वाङ्मनसाऽप्राप्यत्वादगणितत्वेन दर्शितो य आनन्दः तथा अमृतं वेदादिषु मरणादिधर्मरहितत्वेन श्रूयमाणं यद्वस्तु तदपि ब्रह्मैव, 'आनन्दो ब्रह्मेति व्यजानात्' 'अमृतं चैव मृत्युश्चे'त्यादिश्रुतिस्मृतिभ्यः, रसपदेन आनन्दमात्रकरपादमुखोदरादित्वं अमृतपदेन प्राकृतधर्मराहित्यं च बोधितं, तथा भूर्भुवःसुवरिति व्याहृतित्रयनिर्दिष्टाः शिक्षोपनिषत्प्रसिद्धा लोका अग्निप्रभृतयः ऋगादिवेदाः प्राणाश्च ये धर्मस्यान्तरङ्गबहिरङ्गसाधनतया यथायथं प्रसिद्धास्ते सर्वेपि ब्रह्मैव, ब्रह्मपदं मध्यमं आपो ज्योतीरसोमृतमित्यत्र भूर्भुवःसुवरित्यग्रिमे च सर्वत्रान्वेति, एतावता 'ब्रह्मार्पणं ब्रह्म हवि'रिति स्मर्यमाणं मुख्यं धर्मतत्त्वं दर्शितं, गायत्रीशिरस उभयत ओंकारस्तु तत्साफल्यार्थः, 'ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा । स्रवत्यनोङ्कृतं पूर्वं परस्ताच्च विशीर्यति,' इति मनुस्मरणात् (अ. २, ७४.) किञ्च, अबादीनां सुवः पर्यन्तानां स्वीकरणमपि ओङ्कारेण ज्ञाप्यते, ओङ्कारस्यार्थस्तु ब्रह्मैव, 'ततोभूत्त्रिवृदोङ्कारो योव्यक्तप्रभवः स्वराट् । स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मन' इति द्वादशस्कन्धवाक्यात्, 'ओमित्येकाक्षरं ब्रह्मे'ति तैत्तिरीये गीतायां च कथनात्, योगसूत्रेषु ईश्वरं प्रकृत्य 'तस्य वाचकः प्रणव' इति पतञ्जलिना सूत्रणात्, 'तत्ते पदं सङ्ग्रहेण ब्रवीम्योमित्येतत्' इति कठश्रुतेश्च, अत्र अकारादिमात्राविचारस्तु गोपथादिश्रुतिभागेषु विस्तीर्ण इति प्रकृते विशेषोपयोगाभावात् नेह स प्रपञ्च्यते । इतरच्छब्दजालं चैतस्मादेव प्रादुर्भूतं, आथर्वणानां माण्डूक्ये 'ओमित्येतदक्षरमिदं सर्वं तस्योपाख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव' 'सर्वं ह्येतद्ब्रह्मे'ति श्रावणात्, प्रणवविषये ते ते विशेषाश्च तत्र तत्र श्रुतिषु बृहत्पराशरादिस्मृतिषु चापाणिपिहिता एवेति किम्बहुना ?

स्वाचार्यैः श्रीविठ्ठलेशैर्दर्शितं पुरुषोत्तमैः । गायत्र्यर्थं यथाबुद्धि श्रीमज्जीवनतुष्टये ॥ १ ॥
विद्वद्रत्नाद् घनश्यामात् स्वतातालब्धशास्त्रदृक् । पञ्चनद्युपनामा[1] द्विजो गोवर्धनोलिखत् ॥ २ ॥

१ अत्राशुकवीश्वराणां छन्दोभङ्ग इव दृश्यते लिपिकृतः प्रमादो वा ।

# शोधपत्रम् ।

| पत्रम् | पङ्क्तिः | अशुद्धिः | शुद्धिः |
|---|---|---|---|
| २ | २२ | नामकरण | नामकरणं |
| २ | ३७ | कृष्णपदोः | कृष्णपदो– |
| २ | ४१ | बोद्धव्यः– | बोद्धव्यः, |
| ३ | १० | ब्रह्मानन्दात | ब्रह्मानन्दात् |
| ४ | १८ | अप्राप्या | अप्राप्य |
| ४ | १९ | ह्येवयं | ह्येवायं |
| ८ | ८ | विश्वाराट्त्व | विश्वाराट्त्वं |
| १२ | २५ | मन्नार्थमगवत्य | मन्नाथमवगत्य |
| १३ | ३२ | विधान-तमुरतापनीये | विधानमुत्तरतापनीये |
| १६ | ३९ | लिङ्गिता | लिङ्गता |
| १७ | १५ | वाग्रिम | वाग्रिमं |
| १९ | २१ | निरूप्यते | निरूप्यते |
| ३ | २८ | ઉજ્જલતા | ઉજ્જવલતા |
| ३ | ३७ | ગાયત્રી | ગાયત્રીની |
| ५ | १ | માની–' | માનીને |
| ५ | २ | 'સવિતુને | 'સવિતુઃ' |

Published by Vadilal N… …Court.
Printed by Laxmib… …gar Press,
26-28, Kolbhat Street, Bombay 2